# तृतीयोऽध्यायः
# राजयोगपरिचयात्मकः

1. राजयोगस्य परिचयः परिभाषा स्वरूपञ्च ।

2. राजयोगानां भेदाः तत्फलञ्च ।

3. जातकानां द्वादशभावेषु राजयोगानां प्रभावः तत्फलञ्च ।

4. प्रमुखाचार्याणां मते प्रमुखराजयोगाः ।

# 1. राजयोगस्य परिचयः परिभाषा स्वरूपञ्च

संसारेऽस्मिन् मनुष्यजीवने धर्मार्थकाममोक्षादिचतुर्विध पुरुषार्थसिद्धया एवं सार्थकं भवति। कलयुगे मनुष्याणां कृते एकमेव पुरुषार्थं अस्ति तत तु अर्थप्राप्तिमेव ।

सर्वेगुणाः काञ्चनामाश्रयन्ते। इति उक्तिः एतादृशाः सर्वाधिकाः प्रचलिता सन्ति। मनुष्यजीवने कीदृशी जातकाः कीदृशी सत्ता, समृद्धिं, लक्ष्मी, भूमिं प्राप्तुं शक्नोति तस्य जीवनयापनं कथं भविष्यति, धनमार्जनााय तस्य जीवने काः शुभाशुभघटनाः भविष्यन्ति। तत् सर्वं जातकस्य जन्मकालिक कुण्डल्यां भवितानां ज्योतिषशास्त्रोक्त राजयोगेन ज्ञातुं शक्यते।

जन्मकुण्डल्यां भिन्न–भिन्न ग्रह–राशि–स्थिति संयोगेन विविधयोगाः उत्पद्यन्ते। तत्र जातकाय जीवने येः योगाः सन्यासप्रेरकाः सन्ति ते 'प्रवज्यायोगाः' कथ्यन्ते। यः योगः जातकाय दारिद्रयं प्रयच्छन्ति तन्नाम 'दरिद्रयोगः'। यः योगः जातक रुग्णं करोति तन्नाम 'रोगकारकयोगः'। यः योगः जातकाय बाल्यकाले आरोग्य–आयुष्यार्थे अरिष्टं करोति तत्तु 'बालारिष्टयोगः' तदवत् यः रयोगः जातकाय राजतुल्यं वैभवं–ऐश्वर्य– धनं –सौख्यं–यशं–पराक्रमं–कीर्तिः–समृद्धिः–सत्ता–भुमिसुखं–गजश्वादि–यानसुखं वा प्रयच्छति तन्नाम राजयोगः इति।

वर्तमानकाले ये योगाः प्रयच्छति जातकास्य जीवनं उन्नतकृत्वा अनेकविधसुखं–राज्यकार्यसिद्धिं–प्रसिद्धिं–यशप्राप्तिः–यानसुखं–स्त्रीपुत्रादि–सुखं–सर्वकारव्यवस्थायां मन्त्री–उपमन्त्री–न्यायप्रबन्धक–भूमिजलवायुसेनायां –सरंक्षक प्रशाशनादि पदप्राप्तिपूर्वकं स्वपराक्रमेण जीवनसार्थकता प्रयच्छन्ति तदेव 'राजयोग' नाम्ना प्रसिद्धाः।

प्राचीनकाले तिस्र–चतुरस्रनगर्याः स्वामी अपि राजा स्वरूपेण प्रसिद्धः अस्ति। किन्तु अद्यतनकाले तु राजयोगस्य फलस्वरंच्च भिन्नं वर्तते।

सर्वकारिप्रबन्धने कोऽपि महत्वपूर्ण पदप्राप्तिः (कमिश्नर, क्लेक्टर, मेजर–सरपंच–लोकसभा–राज्यसभा–विधानसभादि मन्त्री, उपमन्त्री, प्रधानमन्त्री इत्यादि सचिवपदं बृहद् उद्याने मुख्यप्रबन्धकमपदम् इत्यादयाः) तथा च अत्याधुनिक उपभोग उपकारणानि बृहत्भूमि स्वामित्व अतीवसुखपूर्णजीवनयापनं, उच्चाभ्यासेनविशिष्ट पदप्राप्तिपूर्वकं धनार्जनं इत्यादि सर्वसौख्यं राजयोगफलस्वरूपेणैव प्राप्यन्ते। राज्यव्यस्थायामपि 'राजा' पदस्य परिभाषा अपि परिवर्तिता।

**राजयोगानां लक्षणानि ––**

राजयोगस्य लक्षणानि अनेकविधानि कथितानि। यथा ज्योतिषशास्त्रोक्त अन्ययोगाः समुत्पद्यन्ते तथैव जातकस्य कुण्डल्यां ग्रह–राशि–स्थितिभेदेन 'राजयोगाः' अपि समुत्पद्यन्ते। नामानुसारेणैव राजयोगं शुभफलदायी ज्ञायते। तत्रग्रहाणां बलं–शुभस्वामीत्वं– शुभ–संयोगेनञ्च आवश्यकं वर्तते। यथा कथितं श्री पाराशरेण –

लक्ष्मीस्थानं त्रिकोणं स्याद्विष्णुस्थानं तु केन्द्रकम्।
तेषां संयोगमात्रेण चक्रवर्ती नरो भवेत्।।[1]

**<u>राजयोगानां लक्षणानि –</u>**

यथा ज्योतिषशास्त्रोक्त अन्ययोगाः समुत्पद्यन्ते तथैव जातकस्य कुण्डल्यां ग्रहराशि स्थितिभेदेन 'राजयोगाः' शुभफलदायी ज्ञायते। यथा कथितं श्रीपाराशरेण –

लक्ष्मीस्थानं त्रिकोणं स्यादिविष्णुस्थानं तु केन्द्रकम्।
तेषां संयोगमात्रेण चक्रवर्ती नरो भवेत्।। [2]

अत्र केन्द्रत्रिकोणाणिपानां संयोगमात्रेण राजयोग उत्पद्यते इति स्पष्टम्। कोऽपि कुण्डल्यां प्रापग्रहाः अपि केन्द्र–त्रिकोादि शुभस्थानानां

---

1. लघुपाराशरी – 1/16
2. मध्यपाराशरी – 1/10

स्वामी सन्ति तर्हि शुभफलमेव प्रयच्छति। तथा च कोऽपि शुभग्रहाः यदा अशुभस्थानानां स्वामी सन्ति तर्हि अशुभफलमेव प्रकरोति। यथा –

लाभं तृतीयं रन्ध्रं शत्रुस्थानं व्ययं तथा।
एषां योगेन यो भावस्तनाशं प्राप्नुयाद्ध्रुवम्।।[1]

अत्र कुण्डल्यां तृतीय– षष्ठं–अष्टं,–एकादशे तथा द्वादशास्थानानि अशुभस्थानानि कथितानि। शुभफलप्रदाने ग्रहाणां शुभराश्यां शुभभावेषु शुभवर्गेऽपि स्थितिः आवश्यकी वर्तते। एतादृशां शुभग्रहाः यदा परस्परं युतिः प्रतियुतिः–शुभदृष्टिः–व्यत्यादि सम्बन्धपूवर्कं यः विशिष्टस्थितिसंयोग संज्ञया ज्ञायते। शुभराशि तु अत्र ग्रहस्य स्वोच्च मित्रराशि कथ्यते। यथा –

स्वोच्चस्वर्क्षसुहृत त्रिकोणगृहणाः केन्द्रोत्तमांशान्विताः।
सौम्यैरीक्षितयुक्तः मध्यमागताः मूत्रत्रिाकेणाश्रिताः।।
भावारोहण खेचराः शुभकराः केन्द्रत्रिकोणाधिपाः।
सम्बन्धेन परस्परं सुयशसं कुर्वन्ति राजोत्तमम्।।[3]

अर्थात्

**1.** स्वकीय उच्च–मूलत्रिकोण–स्वक्षेत्र वा मित्रग्रहक्षेत्रे स्थितग्रहः।

**2.** कुण्डल्यां केन्द्र वा त्रिकोणभावे स्थितग्रहः।

**3.** जन्म एवं नवांश कुण्डलयोः एकैव राश्यां स्थितोवर्गोत्तमी ग्रहः।

**4.** शुभग्रहेण युतौ वा दृष्टो ग्रहः।

**5.** शुभकर्तरो मध्ये स्थितग्रहः।

**6.** श्वराशीतः स्वोच्चराशी प्रत्यगच्छन आरोहीग्रहः।

**7.** कोऽपि कुण्डल्यां केन्द्रत्रिकोणाधिस्व योगकारग्रहः।

एते सर्वे ग्रहाः स्वदशान्तर्गतदशाभुक्त्यां जातकाय धन–कीर्ति, यश–मान, कीर्ति–प्रतिष्ठा, सत्ता, सम्मनाप्रदानपूर्वकं राजयोगकारकाः भवन्ति। एते राजयोगकारक ग्रहाः गृहादि षड्वर्गेषु अपि शुद्धाः नीच अस्वादि दोषमुक्ताः, षडबलग्रहयुक्ताः, अपेक्षिताः अस्ति।

---

1. उत्तरकालामृतम् – 4/1

यथोक्तं मीनराजेन –

यन्मित्रस्य गृहे फलं स्वभवने तुलो त्रिकोणे यथा।
तत्सर्वे विद्धाति जन्मसमये षड्वर्गशुद्धोः ग्रहः।।
एकस्तस्र हि सार्वभौमकरो हस्त्यश्वकोशान्वितः।
द्वयौधौ किन्नरदेवशक्रविधयो जायन्ति मर्त्याः ग्रहैः।।[1]

जन्मकालिक कुण्डल्यां यः ग्रहः षड्वर्गे शुद्धो अस्ति अर्थात् षड्वर्गकुण्ड्ल्यासु अधिकांश वर्गोत्तमराश्यां वा स्थितः मित्रराशि, स्वराशिः, शुभग्रहराशिः, वर्गोत्तमराश्यां वा स्थितः स्युत् तर्हि सः ग्रहः खलु स्वोच्च मूलत्रिकोण–स्वगृहादि सदृश फलमेव प्रयच्छति। यदि एकोऽपि ग्रहः षडवर्गशुद्धो भूत्वा बली भवति चेत् तर्हि सः ग्रहः जातकाय श्रेष्ठराजयोगं प्रयच्छति। यदि द्वै–त्रयः–चतुर्थ–पञ्च वा अधिकग्रहः षडवर्गेशुद्धाः स्थिताः सन्ति। कुण्डल्यां तर्हि जातक नराधिपः, किन्नराधिपः, वा मनुष्येत्तरयोनि सदृश अपूर्व भाग्यवान भवति।

यदि सूर्यादिग्रहाः  स्वनीच वा शत्रुक्षेत्री पापग्रहेणयुत वा दृष्टाः पापग्रहस्य नवांशे, षड्वर्गेषु पापग्रहराश्यां अष्टकवर्गे अल्पबुद्धियुक्तं सूर्यकिरणैः अस्तंगताः शुभग्रहदृष्टिहीनाः षड्बलहीनाः सन्ति चेत् तर्हि अशुभ –फलदायकाः स्युः। यथोक्तं वैद्यनाथेन ––

नीचारिपापखगयोगानिरीक्ष्यमाणस्त –
द्वर्शसन्धिलघुबिन्दुदुरंशकाश्च।
आदित्यरश्मिपरिभूतपराजितास्ते
दृष्टयाद्विशक्त्यसंहिताश्च न शोभ्नाः स्युः।। [2]

––––––––––––––––––––––––––––––––––––––––––––––

1. वृद्धयवनजातकः – 1/10
2. जातक पारिजातः – 2/38

उपरोक्तश्लोकैः ज्ञातुं शक्यते यत् कोऽपि कुण्डल्यां ग्रहाणां शुभयुति दृष्टि–विशिष्टभावः एवं राशिस्थितिः कारणसंयोगेन राजयोगः समुत्पद्यन्ते। किन्तु राजयोगस्य नाममात्रेण जातकाय राजयोगस्य सम्यकमध्ययनं कृत्वा शास्त्रकथितंशुभाशुभफल प्राप्त्यर्थे राजयोगनिर्माणे ये ग्रहाः सम्मिलिताः तेषां सर्वेषां बलं–भावं–राशिस्थिति सम्बन्धं इत्यादीनां गहनााभ्यासपूर्वकं समीक्षणम् विश्लेषणमपि अनिवार्यम्।

घटितराजयोगे ते ग्रहाणां जन्मकुण्डली परत्वे शुभाशुभभावाधिपत्यः, लग्नेशः सह नैसर्गिक – तात्कालिकमैत्री, नवांशादि षड्वर्गेषु शुभाशुभस्थितिः , दिक्, कालादि षुडयुक्तराशिः सन्दर्भे स्वक्षेत्री स्वोच्चनीचराशीस्थितिः, मलत्रिकोण –मूलमित्रराशिस्थितिः केन्द्र–त्रिकोणादि शुभभावाधिपत्यः, शुभपापग्रहकर्तरीयोगमध्यत्वं अन्य शुभाशुभग्रहाणं युति दृष्टि, मैत्री आि सम्बन्धं, सम्बन्धितग्रहस्य प्रकृतिः (कारक–मारक–बाधिकत्वम् ) सम्बन्धितभावानां प्रभावकारकत्वं ग्रहयुद्धे बलाबलं, सूर्येशसहकालांशपूर्वकं उदयास्त वक्री स्थितिः, अष्टकवर्गे अन्यग्रहपरत्वे रेखाबिन्दुप्राप्तिः पूर्वकं शुभाशुभत्वं, सर्वतोभद्रचक्रे शुभाशुभग्रह वेधस्थितिः ताजिकोक्त पञ्चवर्गी अधिकार–वक्रस्थितिः, फलप्रदाने ग्रहस्य गृहादि षोडशवर्गे विंशोपकबलगणना इत्येषां सर्वेषां उचितज्ञानं भवितुं अर्हति। यथोक्तं श्री पाराशरेण ––

वर्गविशोपकं ज्ञेयं फलमस्य द्विजषर्भः।
पञ्च यत्र फलं बुद्ध्या तत्फलं परिकीर्तितम्।।
वर्गविंशापकं चादावुदयास्तमतः परम्।।
पूर्णं पूर्णेति पूर्णं स्यात् सर्वदैवं विचिन्त्येत्।। [1]

अनेन ज्ञायते ज्योतिषशास्त्रोक्त ये राजयोगाः फलप्रदाः कथिताः ते सर्वे ग्रहाणां पूर्ण बली एव शुभस्थितिवशात् व्याख्यायिताः। यदि घटकग्रहाः

---

1. पाराशर होराशास्त्र – 8 / 30–31

शास्त्रोक्त प्रमाणितशुभाः बलान्विता न सन्ति तर्हि फलप्रदानेऽपि न्यूनाधिकतमं प्रवर्तन्ते। यथा कथितं वैद्यनाथेन ––

स्वोच्चत्रिकोण स्वसुहृदच्छत्रुनीचगृहार्कगैः।
शुभं सम्पूर्णपादोनदलपादात्पनिष्फलम्।। [1]

अर्थात् सूर्यादिग्रहाः स्वकीय उच्चराश्यां सम्पूर्णशुभफलं, त्रिकोणराश्यां पादोनशुभाशुभफलं स्वराश्यां अर्धशुभफलं स्वामिक्षेत्रे चतुर्थांशशुभफलं, शत्रुक्षेत्रे न्यूनशुभफलं प्रयच्छति।

स्वनीचराश्यां स्थितो ग्रहः वा सूर्येण अस्तगतः ग्रहः फलप्रदाने निष्फलो भवेत्।

---

1. जातक पारिजात – 7/58

## 2. राजयोगानां भेदाः तत्फलञ्च ।

ज्योतिषशास्त्रोक्तराजयोगानां होराशास्त्रे तदुनगताग्रन्थेषु च कति प्रकारकाः भवन्ति, केन् कारणेन तद् भेदाः भवन्ति च इत्येषां समेषां योगानां विवेचनं तथा च तत् फलानां विवरणमपि अत्र प्रस्तूयते–

**रा**जयोगानां प्रमुखभेदाः त्रयः सन्ति । यथा –

1. महायोगाः– राजयोगाः
2. विपरीतराजयोगाः
3. नीचभङ्गराजयोगाः

ज्योतिषशास्त्रस्य प्रमुखाचार्याः स्व–स्वग्रन्थे राजयोगस्य विस्तृत वर्णनं कृतमस्ति।

बृहत्होराशास्त्रे श्री पराशरेण केन्द्र–त्रिकोणग्रहजनित उच्चस्थग्रह–जनितः नवमांशलग्नाधारेणघटितः तथा जन्मलग्न–होरालग्न–घटीलग्ना–धारितयोगाः अपि कथिता सन्ति। ग्रन्थेऽस्मिन् विशेषधनयोगाः एवं दरिद्रयोगाः अपि भिन्न–भिन्न अध्यायेषु वर्णिता सन्ति।

अन्य ग्रन्थानां तुलनादृष्ट्या ग्रन्थेऽस्मिन् अतीव सूक्ष्मरूपं राजयोगानां विवेचनं कृतमस्ति। महर्षिपराशरस्य ग्रन्थोऽयम् सर्वे ज्योतिषग्रन्थानां उपजीव्यरूपेण प्रवर्तते। अतः एतेषां राजयोगानां विश्लेषणात्मकमध्ययनं कृतं मया शोधप्रबन्धे विविधराजयोगानां वर्णनं कृतं मया ।

ज्योतिषाचार्यैः राजयोगानां या परिभाषां कथिता तेनााधारेण जातकस्य जन्मकुण्ड्ल्यां ग्रहः–राशि–भावस्थिति युति–दृष्टिसंयोगेन शुभाशुभयोगाः समुत्पद्यन्ते। तत्र कन्द्रत्रिकोणादिशुभ स्थानाधिपतिग्रहाणां सम्बन्धेन तेषां स्वोच्चमित्रादि राशिस्थितयााधारेण, ग्रहाणां वक्रत्वकारणेन तेषां नीचभङ्. गयोगाकारणेन योगकारकग्रहाणांशुभाशुभभावस्थित्याधारेण, अशुभग्रहाणां व्यत्ययसम्बन्धेन अपि राजयोगाः भवितुं शक्यन्ते।

ज्योतिषशास्त्रस्य जैमिनीसूत्र,लघुपाराशरी,बृहत्होराशास्त्र,बहृत्ज्जातक फलदीपिका–मानसागरी–सारावली–उत्तराकालामृत–जातकपारिजात

–जातकत्वं जातकाभरणं–जातकादेशमार्गः–शतयोगमज्जरी–भावार्थरत्नाकर –भावकुतूहलं–होराशतकम्–होरारत्नं–प्रश्नमार्गः–वृद्धयवनजातकम्–सर्वार्थ–चिन्तामणिः–फलितमार्तण्डाादि विविधग्रन्थेषु एतेषां राजयोगानां वर्णनं प्राप्यते। तेनाधारेण तेषां सर्वेषां परिशीलनं कृत्वा केषाञ्चित प्रमुखराजयोगानां भेदानि फलानि च मया वर्णितम्। तद्यथा –

**1.लक्ष्मीयोगाः ––**

केन्द्र मूलत्रिकोणस्थे भाग्येशे परमोच्चगे।
लग्नाधिपे बलाढ्ये च लक्षणायोग इतीरितः।। [1]

गुणाभिरामो बहुदेशनापो विद्यामहाकीर्तिरनङ्गरूपं।
दिगन्तविश्रान्तनपालबन्धो राजाधिराजो बहुदारपुत्रः।।

यदि भाग्येश स्वमूलत्रिकोण वा परमोच्चराश्यां केन्द्रे स्थितोऽस्ति तथा लग्नेश अपि बलवान् चेत् तर्हि लक्ष्मीयोगः भवति। अस्मिन् योगे उत्पन्नजातकः अनेकगुणसम्पन्नः विद्याक्षेत्रे कीर्तिवान् कामदेव सदृशः स्वरूपवान् अनेकदेशाधिपतिः दिगदिग्न्ते राजपूज्यः बहुभार्या पुत्रयुक्तः तथा च राजाधिराजः भवति।

**2.इन्द्रयोगः ––**

चन्द्रादिक्रमगः कुजोऽवनिसुतादस्ते शनिः सूर्यजा –
दस्ते दैत्यगुरुः सितान्नदनगौ जीवौ यदीन्द्राहवयः।
ख्यातस्तत्रभवः सुशीलगुणवान् भूपोऽथवा तत्समो –
वाग्मी वित्तविचित्रभूषणयशोरूपप्रतान्वितः।। [2]

यदि जन्मराशिकुण्डल्यां चन्द्रतः तृतीयभावे भौमः स्यात् भौमतः सप्तमे शनिः स्थितोऽस्ति चेत् शनितः सप्तमे अर्थात् भौमेन सह शुक्रः स्यात्,

---

1. जातक. – 7/152
2. जातक – 7/68

शुक्रतः सप्तमेभावे अर्थात् शनिना सह बृहस्पतिः स्थितो चेत् तर्हि ''इन्द्रनामकं योगः'' भवति।

इन्द्रयोगे जातः मनुष्य सुशीलः, गुणी, नृपः, नृपसदृशो, वा वाग्मी, धनवान, य शकीर्तिःवान, अनेकविध आभूषणयुक्तः, स्वरूपवान एव भवति।

**3.कुबेरतुल्यराजयोगः ——**

जीवनिशाकरसूर्याः पञ्चमनवमतृतीयणा वक्रात्।
यदि भवति तदा राजा कुबुरतुल्यो धनैर्वासौ।। [1]

यदि कुण्डल्यां भौमतः बृहस्पतिः, चन्द्रः तथा सूर्यः क्रमेण पञ्चमे, नवमे, ततीयभावेषु स्थिताः सन्ति तर्हि सः जातकः कुबेरसदृशः धनी राजा एव भवति।

**4.ध्वजोत्तमयोगः ——**

**मे**षे वृषे झषे राशिः वापि स्थितः स्थाने ग्रहो यदि।
दौलाछत्रप्रदो योगो राजयोगध्वजोत्तमः।। [2]

यदि जन्मकुण्डल्यां मेष–वृषभ वा मीनराश्यां शुभस्थानेषु ग्रहाः सन्ति तर्हि ध्वजोत्तमं नामक दोलाच्छत्रप्रदाता राजयोगः भवति।

ध्वजयोगे उत्पन्न जातकः नीचकुले जातकोऽपि दोलायुक्त अन्याः छत्रयुक्तमन्त्री तथा नृपकुलोत्पन्नजातकः निश्चितः राजा भवति।

**5.सिंहासनयोगः ——**

एषः सिंहासनो योगः कन्यालौ वृषके झषे।
चापे नरे हरौ कुम्भे ग्रहश्चैव परोमतः।।
दन्ती तुरङ्गणः युक्तो नौकावेष्टी गुणी कान्तः।
नृपसचिवो भवति नृपो योगे सिंहासने जातः।। [3]

जातकस्य सर्वे ग्रहाः यदि कुण्डल्यां कन्या–वृष–वृश्चिक–मीन–धनु

---

1. सारा. – 35/168
2. होरारत्नम् – 5/88
3. होरारत्नम् – 6/80–81

–**सिंहरा**शिसु भवन्ति चेत् तर्हि सिंहासन नामको राजयोगः भवति।

जातकोऽयं गजाश्वादिसवारीयुक्तौ नौकावेष्टी, गुणी, जनप्रियः, सचिवः व नृपः भवति।

**6.राजाधिराजयोगः ––**

मानस्थानपतौ पराभवगते पारापतांशेऽथवा
स्वोच्चर्क्षसुहन्नवांशकगते राजाधिराजो भवेत्।।
लग्ने नीचगृहे पुरन्दरगुरौ रन्ध्रे पापग्रहे
तद्रायंशसमान्विते यदि तदा राजाधिराजो भवेत्।। [1]

यदि दशमेशग्रहः पारावतांशे स्वराश्यां स्वोच्च–मित्रनवांशे भूत्वा अष्टमभावे स्यात् तर्हि जातकः राजाधिराजः भवेत्।

नीचराशिगतः बृहस्पतिः लग्ने स्यात् अर्थात् मकरलग्ने गुरुः स्यात् तथा च अष्टमभावे पापग्रहस्य नवांशे तस्याधिपतिः स्थितोऽस्ति चेत् तर्हि जातकः मनुष्यः राजाधिराजः भवेत्।

**7.शक्रतुल्यराजयोगः ––**

उपचयगृहसंस्थो जन्मयो यस्य चन्द्रात् –
शुभग्रह नवमांशे केन्द्रयाताश्च सौम्याः।
स्कलबलवियुक्ता ये च पापाभिधानाः
स भवति नरनाथः शक्रतुल्यो बलेन्।। [2]

यस्य कुण्डल्यां चन्द्रतः उपचयस्थाने लग्नेश स्यात् शुभनवांशगताः शुभग्रहाः केन्द्रेस्थाः स्युः तथा च प्रापग्रहाः षड्बलविहीनाः स्युः सः जातकः इन्द्रतुल्य प्रतापी राजा भवति।

**8.चक्रयोगः ––**

---

1. **जातक – 7/15**
2. जातक – 7/32

कर्मेशस्थानगते राहुः कर्मशे लग्नसंयुते।
लग्नेशे भाग्यराशिस्थे योगश्चक्रमुदीरितः।।
बहुदेशाधिनाथस्य सेनानी नृपवन्दितः।
चक्रयोगे तु संजातं एकविंशतिवत्सरात्।।[1]

अर्थात् राहु दशमसथाने दशमेश लग्ने तथा लग्नेश नवमभावे स्यात् तर्हि चक्रयोग जायते। अस्मिन् योगे मनुष्यः उच्चपदाधीशः, साम्राजस्य सेनापतिः राज्ञा, सममानितः स्यात्। तस्य भाग्योदयः एकविंशतितमे वर्षैव स्यात्। चक्रयोगोऽयं नाभसयोगोक्तः चक्रंयोगात् भिन्नः वर्तते।

**9.कुसुमयोगः –**

स्थिरलग्ने भृगौ केन्द्रे त्रिकोणकेन्द्रौ शुभेतरे।
मानस्थानगते सौरे योगोऽयं कुसुमो भवेत्।।
दात महीपमण्डलनाथवन्द्यो भोगी महावंशराजमुखः।
लोके महाकीर्तियुतः प्रतापी नाथो नराणां कुसुमोद्भवः स्यात्।।[2]

वृष–सिंह–वृश्चिक–कुम्भलग्नेषु अर्थात् स्थिरजन्मलग्न कुण्डल्यां शुक्र केन्देषु स्यात् पञ्चमभावे इन्दु स्थितो चेत् दशमभावे शनिः सयात् तर्हि कुसुमयोगः भवेत।

**10.तपस्वी–राजयोगः ––**

शुभभवनसमेतै सौम्यभागेषु सौम्यैः
स्फुटरुचिरकराद्यैः प्रस्फुरभ्दिर्विलग्ने।
रविमुषितमयुखैस्तैश्च पापैरमिश्रै
गिर्रिगहननिवासी तापसः स्यान्नरेन्द्रः।। [3]

---

1. शतमञ्जरी – श्लोक – 3
2. जातक – 7 / 154–155
3. सारावली– 35 / 51

यस्य जन्मकुण्डल्यां स्फुटकिरणयुक्ताः शुभग्रहाः शुभराशिषु शुभनवांशे लग्ने स्युः तथा च सूर्येण अस्तगताः न स्युः पापैयुक्ताऽपि न स्युः तदा सः जातकः वनपर्वतनिवासी नृपः स्यात्।

**11. नीचकुलोत्पन्नराजयोगः ——**

उच्चस्थानगताः सौम्याः केन्द्रस्थाने भवन्ति चेत्।
ध्रुवं राज्यं भवेतस्य यदि नीचसुतौ भवेत्।। [1]

यस्य जातकस्य कुण्डल्यां सर्वशुभग्रहाः स्वोच्चेराशीषु केन्द्रेषु स्थिताः सन्ति तर्हि सः निश्चितरूपेण राज्यं प्राप्नोति यतोहि सः नीचकुलोत्पन्नः किं नास्ति।

**12.गोपालकुलोत्पन्नः ——**

लग्नाधिपतिः केन्द्रे बलपरिपूर्णः करोति नृपतुल्यम्।
गोपालकुलोऽपि जातं किं पुनरिहः नृपतिसम्भूतम्।। [2]

यदि जन्मलग्नाधिपतिः पूर्णबली भूत्वा केन्द्रस्थाने स्थितो चेत् तर्हि योगेऽस्मिन् जातः मनुष्यः गोपकुले जायमानेऽपि नृपतुल्यः भवति।

**13.गजकेसरीयोगः ——**

केन्दे देवगुरौ लग्नाच्चन्द्राद्वा शुभदृग्युते।
नीचास्तरिगृहैहीर्नै योगोऽयं गजकेसरी।।
गजकेसरी सञ्जातंस्तेजस्वी धनवान् भवेत्।
मेधावी गुणसम्पन्नो राजप्रियकरो नरः।। [3]

लग्न वा चन्द्रकुण्डल्यां केवलं शुभग्रहदृष्टः युक्तो वा बृहस्पतिः केन्द्रे स्यात् तर्हि गजकेसरी नामको राजयोगः भवति। तत्र गुरुः नीच वा शत्रुराश्यां तथा च अस्तंगतो न भवितुं अर्हति।

योगेऽस्मिन् जातः मनुष्यः मेधावी, गुणसम्पन्नो, धनी, वैभवयुक्तः एवं राजप्रियः भवति।

---

1. मान. – 4/26 2.मान. – 4/77 3.बृहत. –37/3–4

**14.पारिजातयोगः ——**

विलग्ननाथस्थितराशिनाथस्थानेश्वरो –
वाऽपि तदंशनाथः।
केन्द्रत्रिकोणोपगतो यदि
स्यात्स्वचतुङ्गणो वा यदि पारिजातः।।[1]
मध्यान्तसौख्य क्षितिपालबन्धो युद्धप्रियो वारणवाजियुक्तः।
स्वकर्मधर्माभिरतो दयालुर्योगो नृपः स्याद्यदि पारिजातः।। [2]

यदि जन्मकुण्डल्यां लग्नेशस्य भावाधिपतिः वा यत् भावधिपतेः नवांशे यदि जन्मकुण्डल्यां केन्द्रे वा त्रिकोणे स्थितोऽस्ति तर्हि पारिजातयोगः भवति।

योगेऽस्मिन् जातः मनुष्यः मध्यमायुः पश्चात् सौख्यंप्रापयते। सः राजपूजितः, युद्धप्रियः, गजाश्वादियुक्तः, दयालुः स्वधर्म कर्मभिरतः नृपतिः स्यात्।

**15.अंशावताारराजयोगः ——**

केन्द्रगौ सितदेवेभ्यौ स्वोच्चे केन्द्रगतेऽर्कजे।
चरलग्ने यदा जन्म योगाऽयमवतारजः।।

पुण्यश्लोकस्तीर्थचारी कालाज्ञः –
कामासक्तः कालकर्ताजितात्मा।
वेदान्तज्ञो वेदशास्त्राधिकारी –
जातो राजश्रीधरोऽंशावतारो।। [3]

---

1. जातक –7 / 156
2. जतक – 7 / 157
3. जातक. –7 / 160–161

यदि चरलग्नकुण्डल्यां बृहस्पतिः, शुक्रौ केन्द्रे स्थितौ स्तः, शनिः स्वोच्चराश्यां भूत्वा केन्द्रे स्यात् तर्हि उत्पद्यन्ते अंशावतारयोगः भवति।

यदि जन्मकुण्डल्यां योगोऽयं चेत् तर्हि सः जातकः पुण्यात्मा, कलाज्ञः, कामी, युगपुरुषः, वेदान्तज्ञः, विद्वान, संयमी, तीर्थाटनी तथा राजलक्ष्मीसम्पन्नः स्यात्।

**16.कल्पवृक्षराजयोगः ——**

दुश्चिक्यनाथे खलु केन्द्रयाते स्यात्कल्पवृक्षो नृप्योगमुख्यः।
जातो भवेदत्र नरेन्द्रपूज्यो गजाश्वाचामीकरयुक प्रतापी।। [1]

यदि जन्मकुण्डल्यां तृतीयाधिपतिःग्रहः केन्द्रस्थाने स्यात् तर्हि कल्पवृक्ष नामको राजयोगः भवति। कल्पवृक्षे योगे उत्पन्न जातकः नृप–पूज्यः गजाश्वादिसेनांयुक्तः प्रतापी नृपः भवति।

**17.कुलभूषणाधिराजयोगः ——**

लग्नाधिपः केन्द्रगतः करोति योगाधिराजं कूलभूषणाख्यम्।
स्ववंशराज्यादधिकप्रतापी स्याच्चक्रवर्ती खलु तत्रजातः।। [2]

यदि जन्मकुण्डल्यां लग्नापिपतिग्रहः बली भूत्वा कन्द्रे स्थितोऽस्ति तर्हि कुलभूषणयोगधिराजः भवति। अत्र तु लग्नेश षड्बलयुक्तः स्वोच्चादि मित्रादि क्षेत्रे अनस्तगतं पापयुक्दृष्टिमुक्तः शुद्धः भवितुमर्हति तत् तु स्पष्टः।

योगेऽस्मिन् जातः स्वकीयकुले स्वराज्यतः अधिकप्रतापी चक्रवर्ती नृपः स्यात्।

**18.सार्वभौम नृपतियोगः ——**

चन्द्र पुष्ये नृपतिः वर्गोत्तमकृतिकाश्विनीसंस्थ।
विद्धाति सार्वभौमं त्रिपुष्करे वाऽपि परिपूर्णः।। [3]

---

1. होरारत्नम् –5/133
2. होरारत्नम् – 5/135
3. सारावली – 35 /164

यदि जन्मकाले पूर्णचन्द्रः **पु**ष्ये वर्गोत्तमे कृतिका, अश्विनी, नक्षत्रेषु वा त्रिपुष्करयोगे अस्ति तर्हि जातकः सार्वभौम नृपः भवति।

**19.स्फीतमहीपयोगः ——**

बुधः कर्कटमारुढ़ो वाकपतिश्च धनधरम्।
सूर्यभसुतदृष्टो च यदि स्फीतोमहीपतः।। [1]

जन्मकुण्डल्यां यदि कर्कराश्यां बुधः धनुराश्यां गुरुः तथा द्वयोः सूर्यभौमाभ्यां दृष्टो स्तः तर्हि सः नरः स्फीतः प्रसिद्धः नृपः स्यात्।

**20.अखण्डसाम्राज्ययोगः ——**

लाभेशकर्मेश धनेश्वराणां एकोऽपि चन्द्रग्रहकेन्द्रवर्ती।
स्वपुत्रलीााधिपतिर्गुरुश्च अखण्डसाम्राज्यपतित्मेति।। [2]

यदि धनेश, नवमेश वा लग्नेश एकोऽपि ग्रहः जन्म वा राशिकुण्डल्यां केन्द्रे स्यात् तथा गुरुः अपि द्वितीय–पंचम वा लाभाधिपतिः भूत्वा केन्द्रे स्यात् तर्हि अखण्डसाम्राज्य नामको अतिशुभ राजयोगः भवति।

**21.नाभसयोगः ——**

रज्जुश्च मुशलश्चैव नलश्येत्याश्रयास्त्रयः।
मालाख्यौ सर्वसंज्ञश्च दलयोगौ प्रकीर्तितौ।।
गदास्यः शकटाख्यश्च श्रृङ्गाटक विहङ्गमौ।
हल–वज्र–यवाश्चैव कमलं वापियूपकौ।।
शर–शक्ति–दण्डे–नौका–कूट–छत्र–धनूषि च।
अर्धचन्द्रस्तु चक्रं च समुद्रश्चेति विंशति।।
संख्याख्यौ–वल्लकी–दाम–पाश–केदार शूलगाः।
युगो गालेश्च सप्तैते युक्ताः दन्तमिता द्विजः।। [3]

---

1. सारावली – 35/181
2. चन्द्रकला. – 2/60
3. बृहत. – 36/3–6

सूर्यादि सप्तग्रहाणां मेषादिद्वादशराशीनां तथा च देहादि द्वादशभावानां विभिन्नस्थितिसंयोगेन द्वात्रिंशत नाभसयोगः सन्ति।

एतेषु नाभसयोगेषु कतिचन योगाः राजयोगकारकाः सन्ति। तद्यथा – अर्धचन्द्र–चक्र–समुद्र–वापी–गदा–यूप–माला–मुसल–केदार–दामिनी–वीणा योगः जातकाय धन–वैभव–राज्य इत्यादयाः सन्ति।

**22.रुचकयोगः (पञ्चमहापुरुषयोगः) ——**

मूलत्रिकोणनिजतुङ्गृहोपयाता
भौमज्ञजीवसितभानुसुता बलिष्ठाः।
केन्द्रस्थितो यदि तदा रुचभद्रहंसामालव्य –
चारुशशयोगकराः भवन्ति।। [1]

कोऽपि जातकस्य जन्मकुण्डल्यां भौम–बुध–गुरु–शुक्र वा शनिः ग्रहः स्वोच्च–मूलत्रिकोणराशीषु लग्नतः केन्द्रस्थाने स्थितो स्यात् तर्हि क्रमेण रुचक–भद्र–हंस–मालव्य एव शश नामकः शुभप्रद पञ्चमहापुरुष राजयोगाः भवन्ति।

रुचकसंयोगे जातः मनुष्यः अतिबलिष्ठः कान्तियुक्तः, शीलवान् लक्ष्मीयुक्तः शास्त्रज्ञः मन्त्रजपाभिचाारकुशलाः राजा अथवा राजासम लावण्यायुक्तः तनुः अरुणसदृशकान्तियुक्तः तयागी शत्रुजितः धनी, सुखी, कीर्तिवान् गजाश्वादिसेनायुधिपतिः तथा सप्ततिवर्षमितः आयुष्मानः भवेत्।

**23.भद्रयोगः ——**

शार्दूल प्रतिमाननो गजपतिः पानोरुवक्षस्थलो
लम्बापीनसुवृतबाहुयुगलस्ततुल्यमानोच्छ्यः।
मानी बन्धुजनोपकारनिपुणः श्रीभद्रयोगा वो।
राजाऽशीतिमितायुरेति विपुलप्रज्ञायशेवित्तवान्।। [2]

---

1. मानसागरी – 4/2
2. जातक – 7/62

भद्र महापुरुषराजयोगे जातः मनुष्यः शार्दूलाननः उन्नतवक्षस्थल पुष्टउरुयुक्तः दीर्घभुजावान् सुवृत्त–पुष्ट–तनुः तत्तुल्यमानावृत्तिः स्वजनोपकारी निपुणः राजा एवं अशीतिमितायुक्तवान् भवेत्।

**24. महायोगाः ––**

अन्योन्यं भवनस्थयोर्विहगर्योलग्नादि फान्तकं।
भावाधीश्वरयोः क्रमेण कथिताः षट्षष्टियोगा जनैः।।
त्रिंशदैन्यमुदीरितः व्ययरिपुच्छिद्रानाथेत्थिता –
स्त्वष्टौ शौर्यपतेः खलाः निगदिताः शेषा महाख्याः स्मृताः।।[1]

श्रीकटाक्षनिलयः प्रभुशयाश्रिन्नवस्त्रकनाका भरणश्च।
पथिर्वाप्तबहुमानसमाज्ञो यानवित्तसुतवांश्च महाख्ये।।[2]

**25. हंसयोगः –**

रक्तास्योन्नतनसिकासुचरणो हंसप्रसन्नेन्द्रियो
गौरः पीनकपालरक्तकरजो हंसस्वनः श्लैष्मिकः।
शङ्खाब्जांकुश मत्स्यदातमयुगकैः खट्वाङ्गमालाघटैः
श्वश्चपादकरसिलो मधुनिभे नेत्रे सुवृत्तं शिरः।।[3]
हंसे सद्विभिष्टुत क्षितिपतिः शङ्खाब्जमत्स्यांकुशै
श्चिै पादकराङ्कितः शुभवर्पुष्टाभुऽधार्मिकः।।[4]

अस्मिन् योगे जातः मनुष्यः रक्तस्वामी, उन्नतनासिका सुचरणोश्च भवेत्। सः गौरवर्णः, कफप्रधानप्रकृतियुक्तः, हंससदृशमधुरभाषी, कन्दर्पतुल्यः, मिष्टाननभोगी, धार्मिकश्च भवेत्।

---

1. फलदीपिका – 6/32
2. फलदीपिका – 6/34
3. मानसागरी – 4/1
4. फल. – 6/3

जातकोऽयं धर्मातमा सुखभाक् राजपूजितः, गुरुद्विजभक्तः, सुचारुदेहदृष्टिः, उदारः, कीर्तिमान, तथा श्लेष्मयुकतः भवेत् इति ग्रन्थकारस्य अभिप्रायः अस्ति।

25. मालव्ययोगः –

न स्थूलकोष्ठो न विषमयवपुर्नातिरक्ताङ्गसन्धि
मध्ये क्षामः शशधररुचिकर्हस्तिनादः सुगन्धतः।
सन्दीप्ताक्षः समसितादो जानुदेशात् पाणि
मालव्योऽयं विलसति नृपः सप्ततिर्वत्सराजाम्।।[1]

योगेऽस्मिन् जातः मनुष्यः न स्थूलोष्ठः, न विषमवपुः, न अतिरिक्ताङ्ग –सन्धियुक्तो, चन्द्रसदृशकान्तियुक्ताः, गजसदृशस्वरयुक्तः, संदीप्तनेत्रयुकतः, श्वेतदन्तयुक्त, दीर्घहस्तयुक्तः, अजानबाहुः, तथा सुगन्धयुक्तो स्यात्। अस्मिन् योग जातः मनुष्यः नृपः भवेत्। श्रीमन्त्रेश्वरेणानुसारेण अस्य योगस्य जातः धैर्यवान, विद्वान, यशस्वी, शान्तिचित्त, यश, वाहनादि युक्तो भवेत्।

**26. शशयोगः**

शस्तः सवजनैः शुभत्यबलवान् ग्रामाधिपोः वा नृपो
दुर्वतः शशयोगयोऽन्यवनितत्तानिवतः सौख्यवान्।
लग्नेन्द्रोऽपि योग्यपञ्चकमिदं साम्राज्यसिद्धिप्रदं।
तेष्वेकादिषु भाग्यवान् नृपसमो राजा नृपेन्द्रोऽधिकः।। [2]

अस्य योग जातः मनुष्यः लघुदन्तमुखः, तीव्रगामी, शठः, अतिशूरो, नृपः भवेत्। सः सुचारुदेही, दुवृत्तिवान्, बलवान, ग्रामाधिपः, वा पूनः भवेत्। इमे योगाः साम्राजयप्रदाः भवन्ति। एकादिषु योगे जातकः समृद्धः भाग्यवान् नृपसमान राजा वा नृपेन्द्र भवेत्।

---

1. सारावली – 37/29
2. फलदीपिका – 6/3

कोऽपि योगः ग्रहाणाः राशि–भाव वा परस्परः सम्बन्धेन सम्भाव्यते। तत्र ग्रहाणां परस्परः युतिः–दृष्टिः–एकतः दृष्टिः वा स्थानपरिवर्तनतया सम्बन्धः भवेत। तत्र द्वौ ग्रहौ अन्योन्यास्य राश्यां स्थितौ स्तः तर्हि तत् व्यत्पत्ति ज्ञायते। इमे प्रकार चतुष्टय सम्बन्धेन शुभफलं प्राप्यते। ते महायोगाः कथ्यन्ते।

लग्नतः द्वादशभावपर्यन्तं परस्परभावाधिपतिः द्वयोः मध्ये व्यत्यय सम्बन्धेन सर्वाहत्य षट्षष्टी योगाः स्युः। तत्र त्रिंशत् योगाः षष्ठेश–अष्टमेश एवं व्वयेश ग्रहैः योगेन उत्पद्यन्ते तेषां नाम दैन्ययोगाः। अरिष्ट स्थानाधिपतिभिः सम्बन्धेन जाताः योगाः इमे अशुभफलप्रदाः भवन्ति।

तथैव च तृतीयेश अपि कोऽपि भावेश सह व्यत्यय क्रियते तदा अशुभफलप्रद अष्टयोागः स्युः। इमे खलयोगाः इति संज्ञया प्रसिद्धाः।

उपरोक्त स्थानाधिपतिः विहाय अन्य शुभस्थानाधिपतयः यदा व्यतयय क्रियते तदा 'महायोग' नामकाः अष्टविंशतियोगाः समुत्पद्यन्ते।

अत्र लग्नेश द्वितीयेश–चतुर्थेश–पंचमेश–सम्तमेश–भाग्येश–कर्मेश–लाभेश ग्रहयोः मध्ये व्यत्यय समबन्धः शुभराजयोगकारकः भवेत्।

श्रीमन्त्रेश्वरमतानुसारेण 'महायोगे' उत्पन्नजातकः सदैव लक्ष्मीकृपा–पात्रः सुन्दरवस्त्रभूषणादि सम्पन्नो यानपुत्र–वित्तवान–धनधान्यादि राज–कृपाधिकार युक्तो भवेत्।

अन्योन्याश्रयसम्बन्धेन भवितानां केन्द्र–त्रिकोण–धनाधिपतिभिः स्थान परवर्तनजनितयोगानां श्रीमन्त्रेश्वरेण विभाजनं कृतम्। ये अधोलिखित स्थानपरिवर्तन कारणेन भवन्ति। सर्वाहत्य अष्टाविंशति महायोगाः स्युः।

1. लग्नेशः द्वितीयभावे – द्वितीयेशः लग्ने स्तः।
2. लग्नेशः चतुर्थभावे – चतुर्थेश लग्ने स्तः।
3. लग्नेशः पञ्चमभावे – पञ्चमेश लग्ने स्तः।
4. लग्नेशः सप्तमभावे – सप्तमेश लग्ने स्तः।
5. लग्नेशः भाग्यभावे – भाग्येश लग्ने स्तः ।

| | | |
|---|---|---|
| **6.** लग्नेशः कर्मभावे | – | कर्मेश लग्ने स्तः। |
| **7.** लग्नेशः लाभस्थाने | – | लाभेश लग्ने स्तः। |
| **8.** धनेशः पञ्चमभावे | – | पञ्चमेशः धनभावे स्तः। |
| **9.** धनेशः सप्तमभावे | – | सप्तमेशः धनभावे स्तः। |
| **10.** धनेशः भाग्यभावे | – | भाग्येशः धनभावे स्तः। |
| **11.** धनेशः कर्मभावे | – | कर्मेशः धनभावे स्तः। |
| **12.** धनेशः लाभस्थाने | – | लाभेशः धनस्थाने स्तः। |
| **13.** धनेशः चतुर्थभावे | – | चतुर्थेशः धनभावे स्तः। |
| 14. चतुर्थेशः पञ्चमभावे | – | पञ्चमेशः चतुर्थ–सुखभावे स्तः। |
| 15. चतुर्थेशः सप्तमभावे | – | सप्तमेश चतुर्थभावे स्तः |
| 16. चतुर्थेशः भाग्यभावे | – | भाग्येशः चतुर्थभावे स्तः |
| 17. चतुर्थेशः कर्मभावे | – | कर्मेशः चतुर्थभावे स्तः |
| 18. चतुर्थेशः लाभभावे | – | लाभेशः चतुर्थभावे स्तः |
| 19. पञ्चमेशः सप्तमभावे | – | सप्तमेश – पञ्चमभावे स्तः। |
| 20. पञ्चमेशः दशम–कर्मभावे | – | कर्मेशः पञ्चमभावे स्तः। |
| 21. पञ्चमेशः भाग्यभावे | – | भाग्येशः पञ्चमभावे स्त।ः |
| 22. पञ्चमेशः लाभस्थाने | – | लाभेश पञ्चमभावे स्तः। |
| 23. सप्तमेशः भाग्यभावे | – | भाग्येशः सप्तमभावे स्तः। |
| 24. सप्तमेशः कर्मस्थाने | – | कर्मेशः सप्तमस्थाने स्तः। |
| 25. सप्तमेशः लाभस्थाने | – | लाभेशः सप्तमस्थाने स्तः। |
| 26. सप्तमेशः कर्मस्थाने | – | कर्मेशः भाग्यस्थाने स्तः। |

**27.** सप्तमेशः लाभस्थाने – लाभेशः भाग्यस्थाने स्त।

**28.** कर्मेशः लाभस्थाने – लाभेशः कर्मस्थाने स्तः।

उपरोक्त कथिताः शुभभावाधिपतिभिः स्थानपरिवर्तन व्यत्ययसम्बन्ध –कारणेन भविताः महायोग नामकाः अष्टाविंशति राजयोगाः अतिशुभफलप्रदा स्युः। श्रीपराशरमतानुसारेण अपि शुभस्थानाधिपतयोः सम्बन्धात् राजयोगाः स्युः।

विष्णुस्थानं च केन्द्रं स्यातलक्ष्मीस्थानं त्रिकोणकम्।
तदीशयोश्च सम्बन्धाद्राजयोगाः पुरादितः।।[1]

केन्द्र अर्थात् लग्न–चतुर्थ–सप्तम एवं दशम स्थानानि विष्णुस्थानानि एवं त्रिकोणस्थाने अर्थात् पञ्चम–नवमस्थाने तथा लग्नं एतानि त्रीणि लक्ष्मीस्थानानि कथितानि। एतेषां अधिपतयोः सम्बन्धमात्र राजयोगकारकः अस्ति।

**(ब) विपरीतराजयोगाः ––**

रन्ध्रेशो वययषष्ठगो रिपुपतौ रंध्रे व्यये वा स्थिते
रिष्फेशोऽपि तथैव रंध्रारिपुभै यस्यस्ति तस्मिन्वदेत्।
अन्योन्यर्क्षगता निरीक्षणयुताश्चन्यैपरयुक्तै क्षिता
जातोऽसौ नृपतिः प्रशस्तविभवो राजाधिराजेश्वरः।।[1]

यदि जन्मकुण्डल्यां वा चन्द्रकुण्डल्यां ––

**1.** अष्टमेश यदि षष्ठमस्थाने वा द्वादशभावे स्थितो चेत्।

**2.** व्ययेश यदि षष्ठमे वा अष्टमभावे अस्ति चेत्।

**3.** षष्ठााधिपितः यदि अष्टमे वा व्ययस्थाने स्थितो चेत् ।

एते दुःस्थानाधिपतयः परस्परेण सह दृष्टिः युतिः भावगतस्थितिः वा परिवर्तनं सम्बन्धं कृताः स्युः तथा अन्यभावेशः युताः–दृष्टाः न स्युः तदा

---

1. बृहत. – 42/28
2. उत्तर. – 4/22

जातो मनुष्यः नृपतिः प्रसिद्धः वैभवयुक्तः राजाधिराजेश्वरः भवति। अत्र तु दुस्थानाधिपतिः ग्रहाः दुस्थाने स्थिताः चेत् तर्हि दरिद्रता–अभाव–अपकीर्ति –असिद्धिः–रोगदि अशुभफलानि नाशयन्ति तद्विपरीते धन'वैभव–कीर्ति सौख्यादि प्राप्यन्ते। अतः उत्तरकालामृतकार श्री कालिदासेन एतानि राजयोगान् 'विपरीतराजयोगाः कथिताः।

अत्र षष्ठ–अष्ट व्ययस्थानधिपतिः यदि त्रिक्स्थानेषु स्थिताः चेत् तर्हि यस्मिन् स्थाने स्थिताः चेत् तस्य सािनस्य हानिः कृत्वा राजयोगाकरी भवेत्। किन्तु यदि त्रिक्स्थाने स्वक्षेत्री भूत्वा स्थितः चेत् तर्हि अयं राजयोगः न सम्भवः।


यदि षष्ठमेशः दुःस्थाने अस्ति तर्हि 'हर्षयोगः' अष्टमेशः दुःस्थाने अस्ति तर्हि 'सरलयोगः' तथा व्ययेशः त्रिक्स्थाने भवेत् तर्हि 'विमलयोगः भवेत्।

**हर्षयोगः**

सुखभोगभाग्यदृढ़गात्रसंयुते निहिताहितो भवति पापभीरुकः।
प्रथितप्रधानजनवल्लभो धनद्युतिमित्रकीर्ति सुवांश्च हर्षजः।।[1]

**ह**र्षयोगे जातः मनुष्यः भाग्यवान् सुदृढ़ शरीरयुक्तः सुखभोगी, पापभीरु प्रसिद्धः प्रधानजनानां प्रियः यशस्वी तथा शत्रुजितः भवति। सः धनसमृद्धिः–पुत्र–मित्रादीनां पूर्णसुखं प्राप्यते। तस्य देहकान्ति युक्तः अस्ति। सः संसारे कीर्तिमान् प्राप्नोति।

**हर्षविपरीतराजयोगः** —




———————


1.फल.–6/64

## लालकृष्ण अडवाणी

भारतीयजनतापार्टी पूर्वाध्यक्ष एवं गृहमंत्री श्रीलालकृष्ण अडवाणी महोदयस्य जन्मपत्रिकायां षष्ठमेश भौमः शत्रुराशि तुलायां व्ययस्थाने सूर्येण सह अस्तं गतो भूत्वा –'हर्षः' नामको तथा अष्टमे बुधः अपि व्ययस्थाने तथैव 'सरल' नामको विपरीत राजयोगस्य निर्माणं करोति। तस्य कीर्तिः, समृद्धिः, को न जानति ?

**विमलयोगः –**

### रविन्द्रनाथ ठाकुरः




श्री रविन्द्रठाकुरमहोदयस्य जन्मकुण्डल्यां चन्द्रोऽपि लग्ने सति राशि–कुण्डली अपि सैव अस्ति। तत्र व्ययाधिपतिः शनिः शत्रुक्षेत्री–निर्बलभूत्वा षष्ठमस्थाने अस्ति परञ्च भैमस्य चतुर्थदृष्ट्याकारणात् पीड़ितः अपि अस्ति। तेन 'विमल' नामको विपरीतराजयोगः समुत्पद्यते। उपरोक्तानि सर्वे फलाानि तस्य जीवने वर्तते।

---


1. फलदीपिका – 6/65

**2.सरलयोगः ——**

दीर्घायुष्मान् दृढ़मतिभयः श्रीमानप्विद्यासुतधनसहितः।
सिद्धारम्भो जितरिपुमलो विख्याताख्यः प्रभवति सरले।।[1]

यदि अष्टमाधिपतिः षष्ठम वा व्ययभावे अस्ति चेत् तर्हि 'सरल' नामको विपरीतराजयोगः भवति। सरलयोगे जातः मनुष्यः दीर्घायुः, दृढ़मतिःख निर्भय श्रीमान् धन–विद्या, पुत्रयुक्तः आरंभकृतकार्यसम्पन्नकर्ताः विख्यातः निर्मलः शत्रुजितः भवति।

## नेपोलियन बोनापार्ट




विश्वप्रसिद्धः फ्रेन्च योद्धा सम्राटः नेपोलियनमहोदयस्य जन्मकुण्ड्ल्यां अष्टमेशः भौमः द्वादशेव्ययस्थाने राहुः सूर्ययो प्रापग्रहप्रभावेन निर्बली भूत्वा 'सरल' नामको विपरीत राजयोगः क्रियते। अत्र सूर्योऽपि व्ययस्थाने पीड़ितः अस्ति। योगोऽयं तस्य जीवने विश्वविजयदायको अभूत्।

---

1. फलदीपिका – 6/65


**विमलयोगः ——**

किञ्चिद्व्ययो भूरिधनाभिवृद्धिं प्रयात्ययं सर्वजननानुकूल्यम्।

सुखी स्वतंत्रो महनीयवृत्तिर्गुणैः प्रतीतो विमलोद्भवः स्यात्।।[1]

यदि व्ययाधिपतिः अशुभग्रहेण युतो–दृष्टो षष्ठमे वा अष्टमे स्थाने जन्म वा राशि कुण्ड्ल्यां सितितो चेत् तर्हि 'विमल' योगः जायते। योगेऽस्मिन् जातः मानवः अल्पव्ययी–अतिधनी–सुखी–स्वतन्त्र–उत्तमकार्य–कर्ता तथा स्वकीय सद्गुणैः विख्यातः भवति। जातकोऽयं सर्वजनाय अनुकूलः वर्तते।

**रविन्द्रनाथ ठाकुरः**




श्री रविन्द्रठाकुरमहोदयस्य जन्मकुण्डल्यां चन्द्रोऽपि लग्ने सति राशि–कुण्डली अपि सैव अस्ति। तत्र व्ययाधिपतिः शनिः शत्रुक्षेत्री–निर्बलभूत्वा षष्ठमस्थाने अस्ति परञ्च भैमस्य चतुर्थदृष्ट्यााकारणात् पीड़ितः अपि अस्ति। तेन 'विमल' नामको विपरीतराजयोगः समुत्पद्यते। उपरोक्तानि सर्वे फलाानि तस्य जीवने वर्तते।

---

1. फलदीपिका – 6/65


**नीचभङ्गराजयोगः**

श्रीमन्त्रेश्वरकृत फलदीपिकायां तथा अन्यग्रन्थेषु कतिपयनीचभङ्ग-राजयोगाः वर्णिताः सन्ति। जन्मकुण्डल्यां नीचग्रहेण सह उच्चग्रहः उच्चनाथग्रहसंयोगेन केन्द्र–त्रिकोणादिषु स्थानेषु विशिष्ट स्थित्यानवांशे उच्चस्थित्या वा तस्य ग्रहस्य अशुभफलं शुभफलस्वरूपेण परिवर्तितः भवेत्। चन्द्रलग्नादपि ग्रहस्थितिः अत्र ग्राह्याः।

**1.धार्मिकचक्रवर्ती राजयोगः –**

नीचस्थो जन्मानि यो ग्रहः स्यातदशिनाथेऽपि तदुच्चनाथः।
स चन्द्रलग्नादि केन्द्रवती राजा भवेद्धार्मिक चक्रवर्ती।।[1]

जातकस्य जन्मपत्रिकायां कोऽपि ग्रहः नीचराशयः अस्ति चेत् तस्याः नीचराशेः अधिपतिग्रहः चन्द्रलग्नात् केन्द्रे (1/4/7/10) स्थितेऽस्ति तथा सः नीचराशिग्रहः यस्यां राश्यां उच्चस्थ भिवेत् सा राशिस्वामी अपि केन्द्रे स्थितो चेत् तर्हि सः नीचस्थग्रहस्य केवलं नीचभङ्गत्व ंना भवेत् अपि तु योगेऽस्मिन् जातः मनुष्यः धार्मिकः चक्रवर्ती राजा भवेत्।





अस्यां कुण्डलयां शुक्रः प्रथमस्थाने कन्याराश्यां नीचस्थ अस्ति। शुक्रस्य नीचनाथः चन्द्रलग्नतः केन्द्रे अस्ति। शुक्रः मीनराश्यां उच्चस्थ भवति। अतः जातकोऽयं भाग्येश शुक्रस्य लग्नेश सह युति कारणेन अपि च केन्द्रगुरोः त्रिकोणेषु शनिना सह युति कारणेन राजयोगः प्राप्यते।

1. फल. – 6/65

**प्रबलतहीपति योगः –**

नीचस्थितग्रहःनवांशपतौ त्रिकोणे केन्द्रेऽथवा
चरगृहे यदि जन्मलग्ने।
तद्भावे चरगृहांशसमविते वा जातो
महीपतिरतिप्रबलोऽथवा स्यात्।।[1]

नीचराशिगतग्रहस्य नवांशपतिग्रहः यदि केन्द्रे वा त्रिकोणे स्थितोऽस्ति चरराशेः जन्मलग्नः चेत् वा लग्नेश चरनवांशे चेत् तर्हि जातः मनुष्यः अत्यन्तप्रबल वा नृपः स्यात्।




अस्यां कुण्डल्यां लग्ने मेषराश्यां मेषनवांशगतः शनिः स्थितोऽस्ति।

तस्य नवांशपति भौमः लग्नात् केन्द्रे स्थितोऽस्ति नवांशे चरराशि मकरे अस्ति।

कुण्डल्यः लग्नमपि चरराशिः मेषस्य वर्तते। अतः अत्र राजयोगः सञ्जायते।

शनेः नीचभङ्ग राजयोगः सञ्जायते।

---


1. जातका – राजयोगाध्याय–65

## 3.राजसमानभाग्ययोगः –


नीचस्थिता जन्मनि ये ग्रहेन्द्रा स्वोच्चारणां राजसमानभाग्याः।
उच्चस्थिता चेद्रपि नीचभागा ग्रहा न कुर्वन्ति तथैव भाग्यम्।।[2]

ये ग्रहाः जन्मकुण्उल्यां नीचराशिगताः किन्तु नवांश कुण्उल्यां उच्चस्थाः सन्ति ते शुभफलप्रदाः भवन्ति तथा च नृपतुल्यभाग्यसुखं प्रयच्छन्ति। जन्मकुण्डल्यां प्रयच्छन्ति। तद्विपरीते जन्मकुण्डलयां उच्चसीाः परच्च नवांशे नीचस्थाः ग्रहाः अशुभफलं प्रयच्छन्ति।

**लग्नकुण्डली**




**नवांशकुण्डली**




---


1. फलदीपिका – 7/27

अस्यां लग्नकुण्डल्यां सूर्यतुलायां शुक्रराश्यां भौमः कर्के गुरु मकरे तथा शनि मेषराश्यां नीचस्थाः सन्ति। परञ्च नवमांश कुण्डल्यां सूर्य मेषराश्यां भैमः मकरराश्यां शुक्रमीनराश्यां गुरुः कर्कराश्यां तथा च शनि तुलाराश्यां स्थितः सन्ति। अत्र जन्मकुण्डल्यां स्थितः नीचग्रहाः नवांशे उच्चस्थाः जातः। अतः नीचभङ्गराजयोगः जातः।

**4.भूपतियोगः –**

चेत् खेचरो नीचगृहं प्रयातस्तदीश्वरच्चापि तदुच्चनााथः।
केन्द्रस्थितौ तौ भवतः प्रसूतौ प्रर्कीतितौ भूपतिसम्भवाय।।[3]

जन्मकाले पत्रिकायां यत् गृहे नीचग्रहसिितो चेत् तस्य नीचनाथः उच्चनाथः केन्द्रसीाने स्थितौ स्तः तर्हि राजकुलोत्पन्न जातकः भूपतिः भवति। अत्रापि नीचभङ्गराजयोगः भवति।




1. अस्य कुण्डल्यां शनिः प्रथमभावे मेषराश्यां नीचस्थः अस्ति।
2. शनेः नीचनाथः भौमः केन्द्रे अस्ति।
3. शनिः तुलराश्यां उच्चः भवति।
4. अत्र नीचनाथः भौमः एवं उच्चनाथः शुक्रः द्वौऽपि ग्रहौ केन्द्रे स्तः।
5. अत्र शनेः नीचभङ्ग भूत्वा राजयोगः सज्जायते।


---

1. फल – 7/28

## 5.वन्दनीयचक्रवर्ती योगः –

यद्येको नीचस्तद्राश्यधिपस्तदुच्चयः केन्द्रेः।
यस्य स तु चक्रवर्ती समस्तभुपालवद्याङ्गाघ्रि।।[1]

यदि कोऽपि ग्रहः नीचराशिगतः अस्ति तथा तस्य नीचनाथः एवं उच्चनाथः द्वौ परस्पराकेन्द्रे स्थितौ स्तः तर्हि अपि नीचभङ्गराजयोगः भवति। जातकोऽयं समस्त राज्ञावन्दितः चक्रवर्तीराजा भवति।




अस्यां कुण्डल्यां नीचस्थशनिः प्रथमभावे मेषे अस्ति।
तस्य नीचनाथःग्रहः भौमःअस्ति।
तस्य उच्चनाथःग्रहः शुक्रः अस्ति।
द्वौ अपि ग्रहौ परस्परतः केन्द्रे स्थितौ स्तः।
मन्त्रेश्वरमतानुसारेण अस्या परिस्थित्यांमपि नीचभङ्गराजयोगः भवेत्।


---

1. फलदीपिका – 7/26

**6.कीर्तिमन्तः राजयोगः –**

यस्मिन्नाशौ वर्तते खेचरस्तद्राशीशेन
प्रक्षितेश्चेत्स खेटः।
क्षोणीपालं कीर्तिमन्तं विद्यध्यत सुस्थानश्चेत्तिकं
पुनः पार्थिवेन्द्रः।[2]

यदि जन्मकुण्डल्यां नीचराशिगतग्रहं तस्य नीचराशिवप्रतिग्रहः पूर्णग्रहः दृष्टिः करोति तदा जातः मनुष्यः कीर्तिमन्तः क्षोणीपालः भवति। अपि च नीचस्थग्रहः सुस्थाने स्थितो चेत् तर्हि जातकः नृपेषु श्रेष्ठः भवति।




1. अस्यां कुण्डल्यां चन्द्रगहः तृतीयभावे वृश्चिकराश्यां नीचगतः अस्ति।
2. तस्याः नीचराश्याः स्वामी ग्रहः भौमः अष्टमे भावे स्थितोऽस्ति।
3. परञ्च भौमः तृतीयस्थाने अष्टमदृष्टया पूर्णतया चन्द्र पश्यां अतः अत्र चन्द्रस्य नीचभङ्गराजयोगः भवति।


---

1. फलदीपिका – 7/28

**7.भूपवन्दितराजयोगः –**

नीचे यस्तस्य नीचोच्चभेशौ द्वावेक एव चा।
केन्द्रस्थश्च्चक्रवर्ती भूपः स्याद्भूपवन्दितः।।[1]

यदि जन्मपत्रिकायां नीचराशिस्थः ग्रहस्य नीचनाथः वा उच्चनाथः द्वौ वा एकैव वा ग्रहः केन्द्रभावे स्थितो चेत् तर्हि सः जातकः राजाभि वन्दितः भूपः स्यात्।




1. अस्यां कुण्डल्यां पञ्चमेश–अष्टमेश ग्रहः गुरु षष्ठभावे तस्य नीचराश्यां अस्ति।
2. मकरराशे स्वामीग्रहः शनिः अस्ति।
3. अतःशनिः तस्यां कुण्उल्यां केन्द्रे स्थितोऽस्ति।
4. अतः श्रीमन्त्रेश्वरमतानुसारेण गुरोः नीचभङ्गराजयोगः सज्जायते। जातकोऽयं राजवन्दितपृनपः स्यात्।


---

1. फलदीपिका – 7/30

**8.भाग्यवान् नृपयोगः –**

नीचे तिष्ठति यस्तदाश्रित्यगृहाधीशो विलग्नाद्वदा।
चन्द्राद्वा यदि नीचगस्य विहगस्योच्चर्क्षनाथोऽथवा।।
केन्द्रे तिष्ठति चेत्पूर्णविभवः स्याच्चक्रवर्ती नृपो
धार्मिकोऽपिमहीशवन्दितपदस्तेजो यशोभाग्यवान्।।[1]

यदि नीचराशिग्रहस्य नीचनाथः उच्चनाथः वा कोऽपि एकः जन्मलग्नात् चन्द्रलग्नात् वा केन्द्रस्थाने विद्यमानः अस्ति चेत् तर्हि तस्य ग्रहस्य नीचत्वंभङ्गः स्यात्। फलस्वरूपे योगेऽस्मिन् जातः मनुष्यः पूर्णमैवयुक्तः धार्मिकः चक्रवर्ती अन्यमहीशचन्द्रितः पद–तेज–यशः भाग्यवान् भवेत्।




1. अस्यां कुण्डलयां बुधः भाग्यवाने तस्य नीचराश्यां मीने स्थितोऽस्ति।
2. मीनराशेः स्वामी शुक्रः चन्द्रलग्नात् केन्द्रे अस्ति।
3. मीनराश्यां शुक्रः उच्चस्थ भवेत् अतः शुक्रः उच्चस्थः भवेत्।
4. अत्र बुधस्यनीचग्रहभङ्गराजयोगः सञ्जायते। तेन कारणेन जातकोऽयं भाग्यवान् नृपः भवेत्।

---

1. फल. –7/29

उपरोक्त राजयोगानां नीचभङ्गरायोगानां शुभशुभफलकथने कुण्उलयां भवितानां अन्ययोगाः ग्रहाणां परस्परं मित्रमैत्री षड्वर्गेषु घटकग्रहाणां स्थितयः तथा च अग्रे वर्णितानि तत्वानि परत्वे कथनीयम्। अद्यतनकाले राजयोगसंयोगे सर्वेजनाः राज्यं न प्राप्यन्ते। किन्तु ग्रहानुसारेण न्यूनाधिकमात्रायां राज्यकारी पदप्रतिष्ठासत्तां प्राप्यन्ते।

# 3. जातकानां द्वादशभावेषु राजयोगानां प्रभावः तत्फलञ्च

## क.मेषादि द्वादशराशयः –

कालपुरुषस्य शरीरे उपरोक्त द्वादशराशयः कल्पिता सन्ति। ते सर्वेगगनमण्डले 27 नक्षत्रेभ्यः भिन्न–भिन्न आकृति स्वरूपे दृश्यन्ते। तेषां नामानि अपि आकृत्याधारेण कथितानि सन्ति। स्वाभावानुसारेण तासां विभागत्रयः सन्ति। तद्यथा ––

1, 4, 7, 10 चरस्वभावः।

2, 5, 8, 11 स्थिरस्वभावः।

3, 6, 9, 12 द्विस्वभावः।

द्वादशराशिणां तत्वानि ब्राह्मणादि भेदानुसारेण ईदृशी सन्ति। यथा –

1, 5, 9, अग्नितत्वम् – क्षत्रियः

2, 6, 10, पृथ्वीतत्वम् – वैश्यः

3, 7, 11, वायुतत्वम् – शूद्रः

4, 8, 12, जलतत्वम् – ब्राह्मणः

स्त्रीपुरुषभेदे सकलविषमराशयः पुरुषप्रकृतिः सन्ति। तथा च समराशयः स्त्रीराशयः सन्ति। यथा –

| पुरुषराशयः | स्त्रीराशयः |
|---|---|
| 1. मेषः | 2.वृषभः |
| 3. मिथुनः | 4.कर्कः |
| 5.सिंहः | 6.कन्या |
| 7.तुला | 8.वृश्चिकः |
| 9.धनुः | 10.मकरः |
| 11.कुम्भः | 12.मीनः |

## ख. सूर्यादिग्रहाः –

सूर्यादिसप्तग्रहाः मेषादीनां अधिपत्यः सन्ति। यथा –

| क्रमः | ग्रहः | स्वराशिः | उच्चराशि: | नीचराशिः | मूलत्रिकोणः |
|---|---|---|---|---|---|
| 1 | सूर्यः | सिंहः | मेषः | तुला | सिंहः |
| 2 | चन्द्रः | कर्कः | वृषभः | वृश्चिकः | वृषभः |
| 3 | बुधः | मिथुनः कन्या | कन्या | मीनः | कन्या |
| 4 | भौमः | मेषः वृश्चिकः | मकरः | कर्कः | मेषः |
| 5 | गुरुः | धनुः मीनः | कर्कः | मकरः | धनुः |
| 6 | शुक्रः | वृषभः तुला | मीनः | कन्या | तुला |
| 7 | शनिः | मकरः कुम्भः | तुला | मेषः | कुम्भः |

सूर्यादिसप्तग्रहाः मेषादीनां स्वामिनः सन्ति। तथा च मेषादिद्वादश–लग्नेषु योगरकमारकः तथा बाधकग्रहरूपेण अपि वर्तन्ते। यथा –

मारकग्रहः स्थानं अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत्।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते।।[1]

---

1. लघुपाराशरी – अध्याय 4/1

जन्मपत्रिकायां जन्मलग्नतः अष्टं भावं तथा तृतीयभावौ आयुस्थानं उच्यते। तयोः व्ययस्थानं क्रमेण सप्तमं एवं द्वितीयस्थानं मारकस्थानं उच्यते। द्वयोः आधिपतिग्रहौ मारकेश वा मारकग्रहः कथ्यते। तत्रापि द्वितीयस्थानं प्रबलमारकं उच्यते।

**बाधकग्रहः ——**

मेषादीनां चर—सिथर—द्विस्वभाव राशीनां बाधकग्रहाः क्रमेण एकादशेशः —नवमेशः तथा सप्तमेशः बाधकग्रहाः भवन्ति अर्थात् मेषः —कर्कः —तुला — मकरः लग्नेषु एकादशस्थानं बाधकस्थानं स्थिरराशयः वृषभः —सिंहः —वृश्चिकः —कुम्भः लग्नेषु नवंस्थानं बाधकम् भवति। मिथुनः— कन्या —धनुः —मीनः लग्नेषु सप्तमं स्थानं बाधकः भवति।

**योगकारकग्रहा : —**

मेषादि द्वादशलग्नेषु केन्द्रत्रिकोणाधिपतयः ग्रहाः योगाकरकाः भवन्ति। यथा —

केन्द्रत्रिकोणनेतारौ दोषयुक्तवपि स्वयं।<br>
सम्बन्धमात्राद् बलिनौ भवतां योगकारकौः।।[1]

महर्षिपराशरकृत लघुपाराशरीग्रन्थे केन्द्र—त्रिकोणाधिपतिः दोषयुर्क्तौऽपि सम्बन्धमात्राद् बलिनौसन्तौ योगकारकौ भेवताम्। अत्र मेषादि द्वादशलग्नेषु ये ग्रहाः सन्ति ते योगाकारकग्रहाः सन्ति ते अत्र वर्णिताः —

———————————————————————————————

1. लघुपराशरी — 3/2

## योगाकारकाः –

| क्रमः | लग्नः | केन्द्राधिपाः | त्रिकोणाधिपाः | योगकारकाः |
|---|---|---|---|---|
| 1 | मेषः | भौमः, चन्द्रः<br>शुक्र, शनिः | सूर्यः, गुरु | सूर्यः |
| 2 | वृषभः | शुक्रः, सूर्य<br>भौम, शनिः | बुधः, शनिः | शनिः |
| 3 | मिथुनः | बुधः, गुरुः | शुक्रः, शनिः | शुक्रः |
| 4 | कर्कः | चन्द्रः, शुक्रः<br>शनिः, भौमः | भौमः, गुरुः | भौमः |
| 5 | सिंहः | सूर्यः, भौमः<br>शनिः, शुक्रः | गुरु, भौमः | भौमः |
| 6 | कन्या | बुधः, गुरु | शनिः, शुक्रः | बुध, शुक्रः |
| 7 | तुला | शुक्रः, शनिः<br>भौमः, चन्द्रः | शनिः, बुधः | चन्द्रः, बुधः |
| 8 | वृश्चिक | भौमः, शनिः<br>शुक्रः, सूर्यः | गुरु, चन्द्रः | सूर्यः, चन्द्रः |
| 9 | धनुः | गुरु, बुध | शुक्रः, सूर्यः | सूर्यः, बुधः |
| 10 | मकरः | शनिः, भौमः<br>शुक्रः, चन्द्रः | शुक्रः, बुधः | शुक्रः |
| 11 | कुम्भः | शनिः, शुक्रः<br>सूर्यः, भौमः | शुक्रः, बुधः | शुक्रः, भौमः |
| 12 | मीनः | गुरुः, बुधः | चन्द्रः, भौमः | गुरु, भौमः[1] |

---

1. लघुपाराशरी – अध्याय–6

**क.**

**मेषादिद्वादशभावाः –**

जातकस्य जन्मकालीनग्रहाणां खगोलीय स्थित्यानुसारेण जन्मपत्रिकां निर्माणं भवति। तत्र जन्मकाले पूर्वक्षितिजे उदितराशि, उदयलग्न वा प्रथमभावः कथ्यते। तस्मात् $180^0$ अन्तरे पश्चिमक्षितिजे अष्टमभाव वा सप्तमभाव लग्नभाव कथ्यते। भूम्योपरि तिष्ठन् जातकस्य शिरोरेखा यत्र दक्षिणदिशि मध्ये भवति। तत् दशतभाव कथ्यते। तस्मात् $180^0$ अन्तरे उत्तरदिशि पाताले चतुर्थभाव कथ्यते। अन्यतः आकाशे कोणात्मक अन्तरे $360^0 \div 30 = 12$ भावानां प्रथम, द्वितीय, तृतीय, चतुर्थ, पञ्चम, षष्ठ, सप्तम, अष्टम्, नवम, दशम, एकादश एवं द्वादश भावसंज्ञाभिः ज्ञायन्ते। वस्तुतः एतेषां द्वादश भावेषु खगोलस्य क्रान्तिवृत्तीय मेषादि द्वादश राशीनां स्थित्यानुसारेण तेषां भावानां उद्बोधनं भवति। अनया रीत्या लग्नस्य परिभाषा भवति यत् जन्म इष्टकाले उदयक्षितिज याम्योत्तर वृत्तीय या राशि स्पर्शति सा एव लग्न कथ्यते। अतएव यस्यां राश्यां सूर्योदय भवति सा एव तत् दिनस्य प्रथमलग्नं भवति।

भानोः उदयात् उदय पर्यन्तं एक अहोरात्रे द्वादशराशयः भिन्न–भिन्न काले उदित भवन्ति। अर्थात् एक अहोरात्रे द्वादश लग्नानि प्रवर्तन्ति।

उपरोक्त पूर्व–पश्चिम, उत्तर–दक्षिण दिशासु चत्वारि केन्द्र भावाः कथ्यन्ते। लग्नात् $120^0$ अन्तरे पञ्चमं एवं नवम भावः त्रिकोण संज्ञया ज्ञायन्ते। द्वितीय पञ्चमं, अष्टमं एवं एकादश स्थानां विशिष्ट संज्ञा ''पणफर'' स्थान भाव उच्यते। तृतीय– षष्ठ –नवम –द्वादश भावानां विशिष्टसंज्ञानां ''आपोक्लिम'' भाव इति उच्यते।

1–4–7–10 भावानां केन्द्र – चतुष्टय कंटकादि संज्ञाः अपि सन्ति। 4–8 भावयोः चतुरस्त्रसंज्ञा तथा च 6–8–12 भावानां त्रिक स्थान संज्ञा अस्ति। तथा च 3–6–10–11 भावानां उपचयस्थानानि कथ्यन्ते। 1–2–4–5–7–8–9–12 भावान् अपचय स्थानानि कथ्यन्ते। त्रिपदासंज्ञया

ज्ञायन्ते। 1–5–9 भावानां त्रिकोणसंज्ञा अस्ति तत्र नवम् भावस्य त्रिकोणसंज्ञा विशिष्टाः सन्ति।

द्वादशराशिलग्नेषु फलपरत्वे अपि विशिष्टसंज्ञाः कथिता तत्र द्वितीय–सप्तमभावौ मारकभावः कथ्यते।

तृतीय–अष्टमभावौ आयुभावः कथ्यते।

1. चरराशि लग्ने एकादशः भावः (मेष–कर्क–तुला–मकरः)
2. सिथरलग्ने नवमभावः तथा च (वृषभः–सिंह–वृश्चिकः–कुम्भः)
3. द्विस्वभावराशिलग्ने सप्तमभाव 'बाधकभाव' स्थान इति विशिष्टसंज्ञा ज्ञायन्ते। (मिथुनः –कन्या –धनुः तथा मीनः)

फलादेशकथने द्वादशभावानां चिन्तितविषयानुसारेण सामान्यसंज्ञाः सन्ति। तद्यथा ––

| **क्रमः** | **भावस्यनाम** | **सामान्यसंज्ञा** |
|---|---|---|
| 1 | प्रथमभावः | तनुः |
| 2 | द्वितीयभावः | धनम् |
| 3 | तृतीयभावः | सहजः |
| 4 | चतुर्थभावः | सुहृदः |
| 5 | पञ्चमभावः | सुतः |
| 6 | षष्ठभावः | रिपुः |
| 7 | सप्तमभावः | जाया |
| 8 | अष्टमभावः | मृत्युः |
| 9 | नवमभावः | धर्मः |
| 10 | दशमभावः | कर्मम् |
| 11 | एकादशभावः | आयः |
| 12 | द्वादशभावः | व्ययः |

लघुपाराशरीग्रन्थे कथिता यथा –

बुधैभावादयः सर्वेज्ञेयाः सामान्यशास्त्रतः।
एतच्छास्त्रानुसारेण संज्ञां बूमो विशेषतः।। [1]

**द्वादशराशयः —**

अनेनप्रकारेण $360^0$ अंशात्मकः खगोले द्वादशभावविभाजनेन प्रत्येक–भावत्रिंशत अंशात्मकं भवति। तद्वदेवद्वादशराशिः अपि $360^0 \div 12 = 30^0$ प्रत्येकराशिमानं भवति। यथा वास्तुशास्त्रे भूम्योपरि वास्तुपुरुषस्य कल्पनाकृता तथैव ज्योतिषशास्त्रे कालपुरुषस्य कल्पनाखगोले कृतास्ति। यथा –

शीर्षास्याबाहुहृदयं जठरं कटिवस्तिमेहनोरुपयुगम्।
जानू जङ्घे चरणौ कालस्याङ्गाानि राश्योऽजाद्याः।।[2]

तथा च बृहज्जातके अपि –

कालाङ्गाानि वराङ्गमाननगुरो हृत्क्रोडवासोभूतो –
वस्तिव्यंञ्जनमरूजानुयुगले जङ्घे ततोऽघ्रिद्वयम्।
मेषाश्विप्रथमानवर्क्षचरणश्चक्रस्थिता राशयोः
राशिक्षेत्रगृहर्क्षमानि भवनं चैकार्थ सम्प्रत्ययाः।।[3]

बृहज्जातकग्रन्थे अस्मिन् श्लोके वरासहमिहिराचार्यः कथ्यते राशि–क्षेत्र–गृह–ऋक्षं तथा भवनं प्रत्येकस्य राशिरितिसंज्ञा तस्येव पर्यायनामानि अपि सन्ति। राशिक्षेत्रगृहर्क्षमानिभवनं च गृहत्वाद्भवनग्रहणे भूग्रहणे सिद्धे यत्पुनर्भवनग्रहणं कृतं तत्सर्वेषां गृहपर्यायाणां ग्रहणार्थम्।[4]

---

1. लघुपाराशरी – 2/1
2. सारावली – 3/5
3. बृहत्जातकः – 1/4
4. बृहत्जातक –पेज. –9, केदारनाथ जोशी, टीका

उपरोक्त श्लोकानुसारेण श्लोकानुसारेण खगोले $30^0$ अंशात्मक द्वादशराशयः तथा च अश्विनी, भरणी इत्यादयः 27 नक्षत्रपूर्वकं प्रवर्तन्ते। तत्र 27 नक्षत्राणां सर्वाहत्य 27 X 108 = पादाः सन्ति। अश्विनतः नवनक्षत्रपादाः प्रभृतिः एकैकस्य राशेः प्रमाणम्। यथा 108 नक्षत्रपादाः, द्वादशराशिविीााागेन एकराश्यां नवपदाः सन्ति। तत्र कालपुरुषस्य शरीरविभागे मस्तके चरणै मीनराशिः वर्तते। तद्यथा –

## द्वादशराशिभाववर्णनम् (परिचयः)

| क्रमः | कालपुरुषस्य अङ्गविभागः | जन्मपत्रिकायां भावसंज्ञा | जन्मपत्रिकायां राशिसंज्ञा |
|---|---|---|---|
| 1 | मस्तिष्कः | प्रथमभावः | मेषराशिः |
| 2 | आननम् | द्वितीयभावः | वृषभराशिः |
| 3 | उरः | तृतीयभावः | मिथुनराशिः |
| 4 | हृदयम् | चतुर्थभावः | कर्कराशिः |
| 5 | उदरम् | पञ्चमभावः | सिंहराशिः |
| 6 | कटिः | षष्ठभावः | कन्याराशिः |
| 7 | वस्तिः | सप्तमभावः | तुलाराशिः |
| 8 | व्यञ्जनम् | अष्टमभावः | वृश्चिकराशिः |
| 9 | उरुयुगलम् | नवमभावः | धनुराशिः |
| 10 | जानुयुगलम् | दशमभावः | मकरराशिः |
| 11 | जङ्घाद्वयम् | एकादशभावः | कुम्भराशिः |
| 12 | पादयुगलम् | द्वादशभावः | मीनराशिः |

**द्वादशलग्नेषु राजयोगाः –**

फलादेशार्थे जन्मपत्रिकायाः द्वादश भावानां अपि दृश्यादृश्यचक्रार्धः वामनदक्षिणभागौ उदितनुदितविभागाः कथिताः केचन ग्रन्थेषु श्लोकेषु एतेषां निर्देशनं कृतम्। नीलकण्ठाचार्यः स्वकीयेग्रन्थे ताजिकनीलकण्ठी ग्रहाणां वाम–दक्षिणदृष्टिभेदः अपि कथिता।

**द्वादशभावेषु राजयोगाः –**

ज्योतिषशास्त्रे होराविभागे फलकथने जन्मपत्रिकायां सूर्यादि नवग्रहाः तेषां लग्नादि द्वादशभावाः एतेषां सर्वेषां शुभाशुभ बलपूर्वकं परस्पर–सम्बन्धपूर्वकं च विवेचनं क्रियते। तत्र ग्रह–राशि–भाव फलादेशे विचारणीयः सन्ति।

**1.सूयादिग्रह विषयकविचारणीयः तत्वानि –**

सूयादिनवग्रहाणां शुभाशुभत्वार्थे काल–चेष्टा–स्थान–दिक्–अयन–नैसर्गिकादिबल विचार्यते। यथा मन्त्रेश्वर फलदीपिका ग्रन्थे षड्बलानि कथितानि –

वीर्यं षड्विधमाह कालजबलं चेष्टाबलं स्वोच्चजं।
दिग्वीर्यं त्वयनोद्भव दिविषदां स्थानोद्भवं क्रमात्।।[1]

कल्याणवर्मणा सारावल्यां सप्तविधबलं कथितं। यथा –

दिक्स्थानचेष्टा क्षण वक्रदृष्टि
स्वाभाविकं सप्तविधं बलस्यात्।
तत्स्वाप्रकारेण बलं ददाति रिक्तो
हि शून्योऽल्पबलोऽल्पवीर्यः।।
क्रूराहतः शत्रुजितो गतश्च –
नीचेऽरिभांशेष्वपि दुष्टचेष्टः।
षष्ठाष्टमे रिष्फगतेऽणुरक्षो –
विनाऽधिकारोप्यफलो ग्रहेन्द्रः।।[2]

---

1. फलदीपिका – 4/1
2. सारावली – 4/4, डॉ. सूर्यकान्त टीका

**2.बालादि अवस्थाः –**

बृहद्पाराशरहोराग्रन्थे षट्चत्वारिंशतमे ग्रहवस्थाध्याये सूर्यादिग्रहाणां बालादिषड्ावस्था – दीप्तादिनव अवस्था –जाग्रतादित्रयः –लज्जितादि षड् अवस्था तथा च शयनादि द्वादश अवस्थाः तेषां फलानि च वर्णितानि सन्ति। यथा –

अवस्थाः विविधाः सन्ति ग्रहाणां द्विजसत्तमः।
सारभूताश्च यास्तासु बालाद्यास्ताः वदाम्यहम्।।[1]

**3.विशेषांकबलम् –**

बृहत्पाराशरग्रन्थैव अष्टमे वर्गविवेकाध्याये षोडशवर्गतः विविधविषयाः कस्मात् वर्गात् चिन्तयते तत् सर्वं तथा च सूर्यादिग्रहाणां विंशोपकबलपूर्वकं शुभाशुभफलं वर्णितं अस्ति। यथा –

अथ वक्ष्ये विशषेण बलं विंशोपकाहृवयम्।
क्रमात् षोडशवर्गाणां क्षेत्रादीनां पृथक–पृथक।।[2]

सूर्यादिग्रहाणां बलाबलविषये लग्नतः स्पष्टद्वादशभावपूर्वकं नवग्रहाणां स्पष्टगणितपूर्वकं विशेषांक बलसाधनकृत्वा पाश्चादे जातकानां शुभाशुभफलं करणीयम्। षोडशवर्गेषु क्षेत्रादीनां षोडशकुण्डलीसु सूर्यादि ग्रहाणां स्थितिपूर्वकं पृथक–पृथं विशेषांकबलं गणनीयम्।

वर्गविशेशांक ज्ञेयं फलमस्य द्विजर्षभः।
यच्च वत्र फलं बुद्ध्या तत्फलं परिकीर्तितम्।।[3]
वर्गविशेषांक ज्ञेय फलमस्य द्विजर्षभः।
पञ्च यत्रफलं बुद्धवा तत्फलं परिकीर्तितम्।।
वर्गविशेषांक चादावुदयास्तमतः परम्।
पूर्णं पूर्णेति पूर्णं स्यात् सर्वदैवं विचिन्त्येत्।।

---

1. बृहत्होराशास्त्र –46/3 **2.**बृहत्पाराशर होराशास्त्र – 8/ 2
3. बृहत्होराशास्त्र –30–31–32

हीनं हीनेति हीनं स्यात् स्वल्पेऽल्प्याल्पं स्मृतम्।
मध्यं मध्येति मध्यं स्याद्यावत्तस्य दशास्थितिः।।[1]

अर्थात् ग्रहाणां शुभाशुभफलस्य आधारं विशेषांक बलमेव अस्ति। विशेषांकबले कथितं सम्यक् प्रकारे ज्ञात्वा फलकथनं करणीयम्। गणनायां पूर्ण–मध्य–हीन बलानुसारेण विशेषांकपक बलज्ञात्व ग्रहाणां दशाफलं जानीयाम्। तथा च ग्रहाणां उदयास्तं अपि फलप्रदाने गणनां कार्याः सूर्यतः सप्तमभावे स्थिताग्रहः पूर्वकं दद्युः। सूर्येण अस्यग्रहाः फलप्रदाने असमर्थाः। एतत सर्वं अनुपातेन मध्यस्थितिः वर्णनीया।

यदा वयं द्वादशभावेषु राजयोगानां विषयकं चिन्तयेत् तर्हि प्रथमतः वयं पूर्वोक्तानि ग्रहबलानि भावानां शुभाशुभमतत्वानि प्रथमतः अवश्यमेव विचारणीयाः। तद्यथा –

1. भावस्य कन्द्र–त्रिकोणादि संज्ञाः ।
2. भावेशग्रहस्य स्थितिः।
3. भावदृष्ट्राग्रहस्य शुभाशुभतत्वम्।
4. भावकारकग्रहस्य स्थितिः।

उत्तराकालामृते ग्रहभावखण्डाध्याये भावफलादेशविषये सूक्ष्मविवेचनं कृतमस्ति। यथा –

यद् भावपतित्रिकोण बलवतो रेत्य केन्द्रः त्रिलाभाश्रितो
मित्रोच्चस्वगृहांशे बलवतो रेत्य स्थितः सोम्ययो
मध्येत्पतिषच्चगेषु च शभैर्युक्तेक्षितो वा ग्रहः
स्ततद्र भाव फलस्य वृद्धिमतुलां शीध्रं करोति क्रमात्।।[2]

यदि कस्यापि भावस्य स्वामीग्रहः केन्द्रत्रिकोणे वा चेत्।

1. तृतीय वा एकादशेभावे स्थितो चेत्।
2. स्वोच्चराश्यां मित्रक्षेत्री, स्वक्षेत्री, स्वननांशगतः चेत्।

---

1. बृहत्होराशास्त्र –33 2. उत्तरकालामृत –4/11

3. शुभकर्तरीयोगमध्ये गतः चेत्।

4. भावेशस्थितराशिस्वामीग्रहः अपि तद्वदेव बली चेत्।

5. यस्य भावोपरि शुभग्रहाणां दृष्टिः चेत्।

6. यस्मिन् भावे शुभग्रहाः स्थिताः सन्ति।

तस्य भावस्य अतुलावृद्धिं शीघ्रं भवेत्। परच्च तत्र भावहानिं कदा भवेत् तदापि वर्णिता सन्ति। तद्यथा –

भाव भावपतिश्च कारकखगस्ते पापमध्यस्थिता।
पापै शक्तिभिरन्धिताश्च विबलाः सौम्येरयुग्वीक्षिताः।
तेषां भाग्य सुखाष्टधीव्ययगतः पापस्तदंशर्क्षपाः
तद्भावे रिपुनीच मूढविजिताश्चेद् भावहानिं वेदत्।।[1]

भावफलादेशे घटकत्रयं महत्वपूर्णमस्ति। तत्र भाव–भावेश–भावकारक–ग्रहाणां निम्नस्थितिः भावहानिं करोति। यथा –

1. यदा भाव–भावेश तथा पापकारकग्रहाः पापग्रहयुतः पापग्रहेणदृष्टिः वा पापग्रहयोः मध्ये पापकर्तरी स्थित्यां सन्ति चेत् तर्हि तस्य भावस्य हानिं भवेत्। यदा तत्रैव अपि फलप्रदाताग्रहाः स्थितिषु सन्ति चेत् तर्हि तस्य भावस्य शुभफलनाशं भवेत् यदि तस्योपरि शुभग्रहदृष्टिः चा तेन सह शुभग्रहयुतिः न स्यात्।
2. यदि भाव–भावेश तथा भावकारकग्रहतः चतुर्थ–पञ्चम–नवं–अष्टम् एवं द्वादशभावेषु पापग्रहः अस्ति चेत् वा तेषां त्रयोः नवांशपतिः शत्रुक्षेत्री–नीचस्थ–अस्तंगतं वा युद्धे पराजितोः सन्ति चेत् तर्हि अपि तद्भावविषयकं हानिं भवेत्।
3. यदि भावः शुभग्रहेण दृष्टः चेत् यदि भावे कोऽपि शुभग्रहः स्थितो चेत् (स्वक्षेत्री, पापग्रहः अपि शुभं कथ्यते।) यदि भावेश स्वोच्चराश्यां वा सुस्थाने स्थितो चेत् अस्तंगतो ना चेत् तथा बली चेत् अथवा यदि

---

4. उत्तराकालामृत –4/12

4. भावेश स्वयं तस्मिन् भावे स्थितो चेत् तर्हि द्वादशभावेषु केचन शुभफलप्रदाः राजयोगाः स्युः। फलदीपिकायां द्वादश्ष योगाः कथिता–

भावैः सौम्ययुतोक्षितैस्तदधिपैः सुस्थानगैर्भास्वरैः
स्वोच्चस्वर्क्षगतैर्विलग्नेभवनाधियोगाः क्रमाद्द्वादश।
संज्ञाश्चामरधेनु शौर्यंजलधिच्छन्नास्त्रकामांसुरा
भाग्यक्ष्याति सु पारिजातमुसलास्तज्ज्ञैर्यथा कीर्तिताः।।[1]

यदि लग्नादि द्वादशभावाः शुभग्रहेणयुक्तः दृष्टः वा चेत् तथा तेषां भावेश ग्रहाः सुसीाने चेत् लग्नादि प्रत्येक भावात् क्रमेण अधेलिखित योगाः समुत्पद्यन्ते ––

| **क्रम** | **भावसंज्ञाः** | **योगाः** |
|---|---|---|
| 1 | प्रथमभावः | चामरः |
| 2 | द्वितीयभावः | धेनुः |
| 3 | तृतीयभावः | शौर्यः |
| 4 | चतुर्थभावः | जलधिः |
| 5 | प ञ्चमभावः | छत्रः |
| 6 | षष्ठभावः | अस्त्रः |
| 7 | सप्तमभावः | कामः |
| 8 | अष्टमभावः | असुरः |
| 9 | नवमभावः | भाग्यः |
| 10 | दशमभावः | ख्यातिः |
| 11 | एकादशभावः | सुपारिजातः |
| 12 | द्वादशभावः | मुसलयोगाः |


1. फलदीपिका – 6/44

**1.प्रथमभावे – चामरयोगः ––**

प्रत्यहं व्रजति वृद्धिमुदगां शुक्लचन्द्रः इव शोभनशीलः।
कीर्तिमान् जनपतिश्चिरजीवी श्रीनिधिर्भवति चामरजातः।।[1]

यदि लग्नेश शुभभावगतः चेत् वा लग्ने शुभग्रहदृष्टि चेत् वा स्वोच्च–स्वक्षेत्री चेत् तर्हि 'चामरयोगः' भवति। चामरयोगे जातः मनुष्यः शुक्लपक्षस्य चन्द्रमासदृशः प्रतिदिनं वृद्धिं प्राप्यते। तथा जीवने पूर्णविकासशीलः भवेत्। सः धनसम्पन्नः, कीर्तिमान, जननायकः, दीर्घायु च भवेत्।

**श्री स्टालीन**




1. रूस देशस्य राष्ट्रपति श्री स्टालिनमहोदयस्य पत्रिकायां प्रथमभावे स्वयं लग्नेशः शुक्रः स्वक्षेत्री स्थितोऽस्ति।
2. प्रथमभावे पञ्चमेस्थितः शुभग्रहगुरोः शुभदृष्टिः तद्भावस्य शुभवृद्धिं क्रियते। अतः श्री स्टालिनमहोदयः चामरयोगस्य पूर्णशुभफलानि प्राप्तवान्।


---

1. फलदीपिका – 6/45

**2.द्वितीयभावे –धेनुयोगः ––**

सन्निपानविभवोऽखिलविद्यापुष्कलोऽधिकुटुम्बविभूतिः।
हेमरत्नधनधान्यसमृद्धो राजराज इव राजति धेनो।।

**श्री महर्षि अरविन्दः**




1. महर्षि श्री अरविन्दघोषस्य पत्रिकायां द्वितीयस्थाने शुभग्रहौ बुध–शुक्रौ स्थितौ स्तः।
2. परञ्च द्वितीयेशसूर्यः स्वयं स्वक्षेत्रे द्वितीयभावे सिंहराश्यां अस्ति। अतः अस्य कुण्डल्यां 'धेनुनामको' राजयोगः उत्पद्यन्ते।

अस्मिन् योगे जातः मनुष्य समस्तविद्याासुपारंगतः विभूतिःअन्नपानाादि सम्पन्नः धनः–धान्यादिसमृद्धियुक्तः भवेत्। श्री अरविन्दः अतीवबुद्धिमान– सावित्री महाकाव्यस्य रचयिता तथा परमयोगी आसीत्।


---

1. फलदीपिका – 6/46

**3.तृतीयभावे –शौर्ययोगे ––**

कीर्तिदिभ्रनुजैरभिष्टुपो ललितो महितविक्रमयुक्तः।
शौर्यजो भवति राम इवासौ राजकार्यनिरतोऽतियशस्वी।।[1]

**वीर महाराजा प्रतापसिंह**




तृतीयस्थाने 'शौर्य' नामक राजयोगः भवति। यदि शुभग्रहैः युत् दृष्टः स्यात् तर्हि शौर्य नामक राजयोगस्य निर्माणः भवति।

1. प्रस्तुत कुण्डल्यां लग्नेशः शनिः स्वयं तृतीये भावे स्थितोऽस्ति।
2. पराक्रमेश गुरुः स्वक्षेत्री भूत्वा स्थानवृद्धिः करोति।
3. भाग्येश बुधः नीचभङ्गराजयोगकारकः अस्ति।
4. सप्तमेश चन्द्रः तृतीये शुभदृष्टिः करोति।

अत्र महाराजाप्रतापस्य कुण्डल्यां तृतीयभावस्य पूर्णतया बलयुक्तः शुभयुक्तश्च वर्तते। तेन कारणेन तत्र शौर्ययोगः पूर्णतया घटितो वर्तते । अतः स जातकः जीवने कीति–शौर्य–वीरता– पराक्रमयुक्तः भवति। सः अनुजैः पूज्य–संतुष्टः: चेत् तथा राजकार्ये निरतः अस्ति।


---

1.फलदीपिका – 6/47

**चतुर्थभावे – जलाधियोगः ––**

गोसम्पद्धनधान्यशोभिसदनं बन्धुप्रपूजे–
वरस्त्रीरत्नाम्बरभूषणानि महितस्थानं च सर्वोत्तमम्।
प्राप्नोत्यबुधियोगजः स्थिरसुखो–
हस्त्यश्चनादिगो राजेऽयो द्विजदेवकार्यनिरतः कूपप्रपाकृत्पथि।।[1]

**बादशाह अकबर**




चतुर्थभावशुभाशुभयुक्तसदृशः चेत् चतुर्थेश बली चेत् तर्हि जलधि–नामको राजयोगः भवति। बादशाह अकबरस्य कुण्डल्यां –

1. चतुर्थस्थाने उच्चस्थः भौमः स्थितोऽस्ति।
2. चतुर्थेशशनिः स्वयं उच्चस्थाने तुलायां लग्ने अस्ति।
3. तथा च गुरुशुक्रेण शुभग्रहेण युतः अस्ति।

अस्य कुण्डल्यां जातः मनुष्यः शरा–माल्वय–कुचक–रुचक–योगाः अपि सन्ति। जलधियोगे जातः मनुष्यः गोधन–धनधान्य–स्त्री–कुटुम्ब–पुत्रादियुक्तः–बृहद्भवनस्वामी–रत्नाम्बरयुक्तः–हस्ति–गजादि–यानयुक्तः–देवद्विजकार्यनिरतः सर्वोच्चपदप्रतिष्ठतः वापी–कूप–तडागादि निर्माता राजपूज्यः भवेत्, अकबरशाह कृते सर्वे सौख्यं प्राप्तवान्।


---

1. फलदीपिका – 6/48

**पञ्चमभावे–छत्रयोगः ––**

सुसंसारसौभाग्यसन्तानलक्ष्मीनिवासो यशस्वी सुभाषी मनीषी।
अमात्यो महीशस्य पूज्यो धनाढ्यः स्फुरतीक्ष्णबुद्धिभावेच्छत्रयोगे

**श्री निकसन**




अमेरिकादेशस्य पूर्वराष्ट्रपतिः श्रीनिकसनमहोदयस्य कुण्डल्यां छत्रयोगस्य रचना पूर्णतया जातः ।

1. तत्र पञ्चमेशः गुरुः स्वक्षेत्रे पञ्चमैव अस्ति।
2. लग्नेशशुभकारकग्रहरूपेण सूर्यः अपि पञ्चमे अस्ति।
3. योगकारकग्रहः भौमः भाग्येश भूत्वा पञ्चमे अस्ति।
4. धनेशः बुधः अपि पञ्चमे शुभफलदायी भवेत्।

अस्य कुण्डल्यां केन्द्रत्रिकोणाधिपतीनां युतिः पञ्चमस्थानं अतीव शुभफलप्रदाता सृज्यते। छत्रयोगस्य फलरूपेण जातकोऽयं सौभाग्यपूर्णः स्त्रीसन्तनादिसौख्यवान–यशस्वी–मनीषी–वक्ता अमात्य वा राजा–राजपूज्यः मन्त्री वा भवेत्। सः अतीव कुशाग्र–बुद्धिमान–लक्ष्मीवान च भवेत्।


---

1. फलदीपिका – 6/46

**षष्ठमभावे– अस्त्रयोगः ––**

शत्रून् बलिष्ठान बलवन्निगृहस्य क्रूरप्रवृत्तया सहितोऽभिमानी।
व्रणाडि.व्रणाडि्.ताड.्स्य विवादकारीस्यादस्त्रयोगे दृढ़गात्रयुक्तः।।[1]

**श्री पृथ्वीराज चौहानः**




प्रतापी राजा श्री पृथ्वीराजचौहानस्य पराक्रमः को न जानाति ? तस्य कुण्डल्यां अस्त्रनामको योगः षष्ठमस्थाने सम्पूर्णो विद्यते। यथा –

1. षष्ठमस्थाने शुभग्रहसुखेशः चन्द्रः स्थितोऽस्ति।
2. भाग्येशगुरु दशमस्थानतः षष्ठे शुभदृष्टिः क्रियते।
3. दशमे केन्द्रे षष्ठेशबुधः मित्रक्षेत्री शुभयुतोश्च अस्ति।

अस्य योगस्य जातः मनुष्यः बलिष्ठान् शत्रून् पराजितकर्ता अभिमानी, दृढगात्रयुक्तः, क्रूरप्रवृत्तः, विवादी राज्ञः भवत्। षष्ठमसीानं दुःस्थानं कथ्यते। तस्य स्वामी दुःस्थाने स्थितोऽस्ति चेत्। तर्हि अपि शुभफलं प्रपदाति जातकाय। स्थितिः इमां विपरीतराजयोगकार भवेत्। अनेन तत्र हर्षयोगः च भवेत्।


---

1. फलदीपिका – 6/50

**सप्तमेभावे—कामयोगः ——**

परदारपराङ्.गमुखो भेवद्वरदारात्मजबन्धु संश्रितः।
जनकादधिकः शुभैर्गुणौर्महनीया श्रियमेति कामजः।।[1]

## श्री छत्रपति शिवाजी महाराजः




यदि सप्तमभावें कामयोगः जायते तर्हि जातकः परस्त्रीविमुखः, सुन्दरस्वस्त्रीपुत्रयुक्तः, बन्धुबान्धवः, सौख्ययुक्तः स्वपितुः अपेक्षयादपि अधिकगुणी जातकोऽयं श्रीवैभवश्च प्राप्यते। अस्मिन् कुण्डल्यां ——

1. सप्तमेशशनिः स्वस्थानतः भाग्ये उच्चगतः अस्ति।
2. लग्नेशः सूर्यः स्वयं सप्तमे स्थित्वा शुभदायकफलं आप्नोति।
3. पञ्चमेशशुभग्रहः गुरु सप्तमभावे बलवृद्धिकारकः अस्ति।
4. अनया ग्रहस्थित्याः कारणेन सः कामयोगोक्तः शुभफलं प्राप्तवान्।


---

1. फलदीपिका – 6/51

**अष्टमेभावे–आसुरयोगः ––**

हन्त्यकार्यपिशुनः स्वकार्यपरो दरिद्रश्च दुराग्रही स्यात्।
स्वयंकृतानर्थपरम्परात् कुकर्मकृच्चासुरयोग जातः।।[1]

**नाथूराम गोडसे**




अष्टमभावः दुःस्थानं अस्ति। दुःस्थानं यदि बली भवेत् तर्हि जातकाय अशुभफलं ददाति। अनेन अष्टमे भावे आसुरनामकः दुर्योगः भवति। नाथूरामगोडसे महोदयस्य पत्रिकायां –

1. अष्टमेशस्थाने गुरुः शुभदृष्टिः क्रियते। किन्तु
2. अष्टमेश शनिः एकादशउपचये स्वनीचराश्यां मेषराशेः अस्ति।
3. षष्ठमेशभौमः अपि अष्टमे पापदृष्टिः क्रियते।
4. शनिः स्वयं दशमदृष्ट्या स्वस्थाने अष्टमे पश्यति।

तेन कारणेन अष्टमसीनः अतिअशुभफलं प्रयच्छति। आसुरयोगे जातः मनुष्यः पिशुनः कार्यनाशकः स्वार्थपरः दुराग्रही अनर्थकरी तेनैव कारणेन अति तथा कुकर्मी भवेत्। नाथूरामस्य कुकर्म वयं सर्वे जानीमः।

यदि अष्टमेश षष्ठे वा द्वादशभावे स्थितो चेत् वा अन्यदुःस्थानाधिपतिः सह युतो चेत् तर्हि सरल नामक शुभफलप्रदं विपरीतराजयोगः उत्पद्यते।


---

1. फलदीपिका – 6/52

**नवमभावे–भाग्ययोगः ——**

चञ्चच्चमारवाद्यघोषनिबिडामान्देलिकां शाश्वतीं
लक्ष्मीं प्राप्य महाजनैः कृतनतिः स्वाद्धनमार्गे स्थितः।
प्रीणात्येष सुरान्द्रिजगणंस्तत्रत्प्रियैः पूजनैः
स्वाचार स्वकुलादेह सुहृदयः स्याद्भाग्ययाग्गोदभवः।।

**श्री परमहंस रामकृष्ण**




भाग्यस्थानं तपस्थानं–धर्मस्थानं अपि कथ्यते। तत्र शुभग्रहाणांदृष्टिः स्थितिः मनुष्याणां आध्यात्मिक उन्नतिं प्रदीयते। श्री परमहंसस्य जन्मपत्रिकायां –

1. भाग्येशशुक्रः द्वितीयेभावे स्वोच्चः मीनराश्यामस्ति।
2. भाग्यभावे स्वयं लग्नेशशनिः स्वोच्चः तुलायां अस्ति।
3. पञ्चमस्थितः गुरोः भाग्यभावे शुभदृष्टिः क्रियते।

अनेन ग्रहसंयोगेन तस्य कुण्डल्यां 'भाग्ययोगः' पूर्णतया सञ्जातः। भग्ययोगे उत्पन्न जातकः राज्यलक्ष्मीं प्राप्य धर्ममार्गे अग्रसरः भवति। भाग्ययोगे उत्पन्न जातकः राज्यलक्ष्मी प्राप्य धर्ममार्गे अग्रसरः भवति। स्वपितृजनान्–सुरान्–द्विजगणान च प्रियकर्मैः प्राप्नोति। जातकोऽयं छत्र–चामर–वाद्यघोषान्दोलिकां राजते। अत्र तु स्वैछिच्काध्यात्मिका उन्नतिं प्राप्तवान्। जातकोऽयं स्वकुलोमारकः, सुहृदय कीर्तिवान् सदाचारी च भवेत्।


———————————————————————————

1. फलदीपिका – 6/63

**दशमेभावे–ख्यातियोगः ——**

सत्क्रियां सकललोकसंमतामचरन्नति सज्जनानृपः।
पुत्रमित्रधनदार भाग्यवान् ख्यातिजो भवति लोकविश्रुतः।।[1]

## पंडित नेहरू




श्री नेहरूमहोदयस्य पत्रिकायां दशमभावः रिक्तः दृश्यते।

1. किन्तु दशमेश भाग्येशः भौमः पूर्णदृष्टया दशमभावे बली विद्यते।
2. चतुर्थेशशुक्रः दशमे शुभदृष्टिप्रभावः प्रदीयते।
3. पराक्रमेशबुधः अपि दशमतः भाग्ये भूत्वा स्वगृही प्रबला दृष्टिः दशमभावे शुभप्रीाावं वर्धते।
4. पराक्रमेशबुधः अपि शुभयुतिभूत्वा दशमे भूत्वा दशमे दृष्टिः क्रियते।

नेहरूमहोदयस्य कुण्डल्यां ख्यातियोगस्य पूर्णरचना सज्जाता। जातकोऽयं ख्यातियोगात्पन्नः सत्कार्यद्वारा सकलजनानां पालयति लोकप्रशंश्रितो नृपः भवति। सः पुत्रमित्रधनदारादिसुखपूर्वकं भाग्यवान् एवं लोके विख्यातः भवति।


---

1. फलदीपिका – 6/61

**एकादशेभावे–पारिजातयोगः ——**

नित्यमङ्.गलयुतः पृथिवीशः सच्चितार्थनिचयः सकुटुम्बी।
सत्कथाश्रवणभक्तिरभिज्ञो पारिजातजननः शिवताति।।[1]

## आचार्य श्रीराम शर्मा




गायत्री उपासक श्रीरामशर्मामहोदयस्य पत्रिकायां प्रथमदृष्टया लग्ने गुरुकेतोः युतिः एवं सप्तमे शनिग्रहोः युतिश्चैव पश्यते। किन्तु आध्यात्मिक–दृष्टया सैव उन्नतिकारको भवतः। परञ्च तस्य –

1. कुण्डल्यां लग्नेशशुक्रः एकादशभावे शुभफलप्रदाता अस्ति।
2. भाग्येशबुधः अपि एकादशभावे भाग्यवृद्धिः करोति।
3. कर्मेश चन्द्रःएकादशभावे शुभप्रभावं वर्धते।

शर्मामहोदयस्य कुण्डल्यां धर्मेश–कर्मेश भाग्येशानां युतिः एकादशस्थाने पारिजातयोगस्य पूर्णरचना क्रियते। योगोऽयं जातक–पारिजातोक्तः योगेन भिन्नः अस्ति। जातकोयोगेऽस्मिन् नित्यमङ्.गलकर्ता सत्कथाश्रवण–भक्तियुक्तः निरन्तरं अनुष्ठानादिकार्यरतः पृथ्वीशः भवति।


---

1. फलदीपिका – 6/55

**द्वादशभावे—मुसलयोगः —**

कृच्छलब्धधनवान् परिभूतो लोलसम्पदुचितव्यय शीलः।
स्वर्गमेव लभतेऽन्त्यदशायां जातमको मुसलजश्चपलश्च।।[1]

**डाकूमानसिंह**




द्वादशस्थानमपि दुःस्थानं कथ्यते। दुःस्थानं यदि बली भवेत् तर्हि तस्याशुभ प्रभावं जातकायप्रयच्छति।

1. अत्र द्वादशेशशुक्रस्यनीचभङ्गयोगः बुधेन सह भवति।
2. नीचस्थशुक्रस्य उच्च स्वामीग्रहः गुरु केन्द्रेस्थितोऽस्ति।
3. द्वादशभावे कर्मेशसूर्यः तुलायां नीचस्थः अस्ति।
4. सूर्यस्य उच्चस्थान शनिः केन्द्रे स्वक्षेत्री अस्ति।

तेन कारणेन विपरीतराजयोगः विमलयोगः पूर्णतया अस्या कुण्डल्यां सज्जायते। तेन कारणेन तस्य धनस्य नित्याभिवृद्धिः जातः। किन्तु मुसलयोगस्य फलस्वरूप जातकोऽयं अतिश्रमसाध्ययनी, परिभूतः मूर्खः चञ्चलवृद्धिवान् व्ययशीलः किन्तु मरणान्ते स्वर्गे प्रापनोति यदि अन्त्यदशानुकूलः चेत्।

---

1. फलदीपिका – 6/56

## 4.प्रमुखाचार्याणां मते प्रमुखराजयोगाः

ज्योतिषशास्त्रे यदा–कदा वयं राजयोगविषयकं विवेचनं कुर्मः तर्हि श्रीमहर्षिपराशरः, वराहमिहिराचार्याः, श्रीकविकालिदासः, श्रीमन्त्रेश्वरः, श्रीवेंकटेशशर्मा, श्रीवैद्यनाथः भगवानगार्गी, श्रीजैमिनिमहर्षि, अत्रिमुनिः, भृगुऋषिः एतेषां सर्वेषां मतानां उल्लेखः अनिवार्यम्। किन्तु गार्गी, नारद, भृगुऋषिः, अत्रि, कश्यपादीनां आचार्याणां ग्रन्थाः पूर्णरूपेण प्राप्ता न सन्ति। क्वचति्–क्वचित् उदाहरणरूपेण तेषां मतानि उद्धृतानि प्राप्यन्ते यत्रतत्र। अतः मया श्रीपराशरः, वराहमिहिराचार्या, श्रीमन्त्रेश्वरः, उत्तरकालामृतकार–कालिदासः, श्रीवेंकटेशर्माचार्या तथा श्रीकल्याणवर्मा एतेषां ग्रन्थेषु प्रमुखराजयोगानां विषये मतं दृष्ट्वा संक्षेपेण विवेचनं कृतमस्ति।

**1.महर्षिपराशरोक्त प्रमुखराजयोगाः ––**

फलितज्योतिषे महर्षिपराशरकृत लघुपाराशरी एव बृहत्पाराशर–होराशास्त्र ग्रन्थद्वयं अपि महत्वर्पूणमस्ति। फलादेशे अन्यग्रन्थाणां मूलभूतउपजीव्यरूपेण च वर्तते। तत्र श्रीपराशरेणग्रहाणां नसर्गिक शुभत्वं बलाबलंपूर्वकं विशेषेण केन्द्रत्रिकोणादिशुभभावाणिपत्यं तथा च त्रिषडा–पाधिपत्यपूर्वकं द्वादशलग्नेषुग्रहाणां योगकारकत्वं परञ्च लग्नपदं पाराजातादिषोडशवर्गस्थितिपूर्वकं राजयोगानां उत्पत्तिः कथिता।

श्रीपराशरमतेन राजयोगकथने न तु मात्र लग्नकुण्डलीतः अपि च कारकांशकुण्डलीतः राजयोगविषयकं चिन्तनं भवति। यथा –

अथाऽतः सम्प्रवक्ष्यामि राजयोगान् द्विजोत्तमः।
येषां विज्ञानमात्रेण राजपूज्यो जनो भवेत्।।
चिन्तयेत् कारकांशे वा जनुर्लग्नेऽथ वा द्विजः।
राजयोगकरौ द्वौ–द्वौ स्फुटौ खेटौ प्रयत्नतः।।

---

1. बृहतपाराशर–होराशास्त्र– अध्याय. 42, 1–3

महर्षिपराशरेण अनेकाः राजयोगाः वर्णिताः सन्ति। परन्तु अत्र ये–ये प्रमुखराजयोगाः सन्ति तेषां नामोल्लेखः प्रस्तूयते मया। तद्यथा–


**1.चक्रवर्ती राजयोगः –**

लक्ष्मीस्थानं त्रिकोणं स्याद्विष्णुस्थानं तु केन्द्रकम्।
तेषां संयोगमात्रेण चक्रवर्ती नरो भवेत्।। [1]

जन्मकुण्डल्यां त्रिकोणस्थानं नवम–पञ्चमस्थाने एवं केन्द्रस्थानानि प्रथम–चतुर्थ–सप्तम्–दशमस्थानानि क्रमशः लक्ष्मी–विष्णुस्थानं कथ्यन्ते। तेषां संयोगमात्रेण जातः नरः चक्रवर्ती भवेत्। अत्र महर्षिणा पूर्वे कथिताः फलादेशनियमाः अपि चिन्तनीयाः। अत्र लग्नस्थानं केन्द्रत्रिकोणस्थानद्वयरूपेण ग्राह्यते।

## चक्रवर्ती राजयोगः

भारतदेशस्य पूर्वप्रधानमन्त्री चौधरचरणसिंह महोदयस्य कुण्डल्यां – 1.भाग्येश सूर्यः प्रथमकेन्द्रे लग्ने स्थितः। 2.कर्मेश बुधेन सह युतिः क्रियते। तत्र त्रिकोणाधिपतिः भौमः दशमेराज्यभावे स्थित्वा लग्ने सूर्यबुधोपरि पूर्णदृष्टिः क्रियते। अतः अस्यां कुण्डल्यां केन्द्रेशबुध–त्रिकोणेशसूर्य तथा च पञ्चमेश भौमस्य परस्परं युतिदृष्टिसम्बन्धेन चक्रवर्ती राजयोगः संजायते।




———


1. मध्यपाराशरी –321


**महाराजयोगः**

लग्नेशे पञ्चमे भावे पञ्चमेश ल लग्नके।
पुत्रात्मकारकौ विप्रा लग्ने च पञ्चमे स्थिते।।
स्वोच्च स्वांशे स्वभे वाऽपि शुभग्रहनिरीक्षते।
महाराजारस्ययोगोऽत्र जातः स्यातः सुखान्वितः।।[1]


यदि कारकांश वा जन्मकुण्डल्यां लग्नेश–पञ्चमेशयोः व्यत्यसम्बन्धः भवेत् एवं आत्माकारकग्रहः तथा च पुत्रकारकग्रहः द्वयो लग्ने वा पञ्चमेभावे स्वोच्चराश्यां वा स्वनवांशे स्थितौ चेत् एवं शुभग्रहेण दृष्टौ चेत् तर्हि महाराजनामकं राजयोगः सञ्जायते। योगेऽस्मिन् जातः मनुष्यः सुखान्वितः विख्यातश्च भवेत्।

लग्नकुण्डली




नवमांश




---

1. बृहत्. – 40/6–7

अस्यां कुण्डल्यां –


1. आत्माकारकग्रहः शुक्रः 22अंशः लग्ने नवांशे तुलायां अस्ति।
2. पुत्रकारकग्रहः बुधः 8अंशः अपि लग्ने तथा नवांशे मिथुनराश्यां स्वग्रही अस्ति। अतः आत्मा तथा पुत्रकारकयो ग्रहौ लग्नभावे स्व–स्व नवमांशे गतौ स्तः।
3. लग्नेशभौमः पञ्चमभावे स्थितोऽस्ति। तथा च
4. पञ्चमेश सूर्यः लग्नभावे अस्ति।
5. सूर्य–भौम–बुधः–शुक्रः शुभग्रहः गुरुणा दृष्टिः सन्ति। अतः अस्यां कुण्डल्यां पूर्णतया महाराजयोगः समुपाद्यन्ते।

**नीचग्रहकृतराजयोगः –**

दुःखस्थानेशोऽपि नीचस्थो यदि लग्नं प्रपश्यति।
तदाऽपि राजयोगः स्यादिति ज्ञेयं द्विजोतमः।।[1]

यदि जातकस्य कुण्डल्यां दुःस्थानाधिपतिग्रहः अष्टमेश–षष्ठमेश वा व्ययेश स्वनीचराश्यामपि स्थित्वा लग्नं पश्यति तर्हि राजयोगः जायते।

**नीचग्रहकृतराजयोगः**




अस्यां कुण्डल्यां षष्ठमेश गुरुः दुःखस्थाने सप्तमभावे स्वनीचराश्यां मकरे स्थित्वा लग्नं प्रपश्यति। तेन कारणेन अत्र नीचस्थगुरुकृतः राजयोगः कथ्यते।


---

1. बृ.पा. होरा–40/28

**अमलकीर्तियोगः**

दशमेङ्गात तथा चन्द्रात् कैवल्यैश्च शुभैयुते।
स योागोऽमलकीर्त्याख्यः कीर्तिचन्द्रतारकी।।
राजपूज्यो महोयोगी दाता बन्धुजनः प्रियः।
परोपकारी धर्मात्मा गुणाढ्योऽमलकीर्तिजः।। [1]

उमाभारती




केन्द्रियमन्त्री उमाभारतीमहोदया कुण्डल्यां लग्नतः दशमे भावे शुभग्रहः स्थितोऽस्ति। अत्र कोऽपि पापग्रहः न युता न दृष्टो चेत्। परञ्च तस्याः कुण्डल्यां चन्द्रः अपि लग्ने स्थितोऽस्ति। अतः चन्द्रात् अति दशमे शुभग्रहस्थितिः सञ्जाता। अतः शुभफलस्य अभिवृद्धि पूर्वको 'अमलाकीर्ति' राजयोगः घटितः। अतः शुभफलस्य अभिवृद्धिः इमां राज्पूज्या दाता–बन्धुजनप्रियः–परोपकारी–धर्मात्मा–गुणाढ्या तथा च अमलकीर्तियुक्ताः प्रसिद्धाः।

**5.श्रीनाथयोगः –**


कामेशे कर्मगे तुड्.गे कर्मेशे भाग्याधिपते।
योगः श्रीनाथसंज्ञोऽत्र जातः शक्रसमो नृपः।।[2]

यदि जन्मकुण्डल्यां सप्तमेशः उच्चराश्यां दशमभावे चेत्। तथा कर्मेशग्रहः भाग्येशग्रहेणयुतः स्यात् तर्हि 'श्रीनाथ' नामको योगः भवति। योगेऽस्मिन् जातः

1. बृ.हो. – 37 / 56
2. बृ.हो. – 37 / 18

मनुष्यः इन्द्रतुल्यवैभवयुक्तः नृपः भेवत्।

**श्रीनाथयोगः**





श्रीमान ईश्वरचन्द्रविद्यासागरमहोदयस्य पत्रिकायां –

1. सप्तमेश बुधः स्वोच्चराश्यां दशमेभावे स्थितोऽस्ति।
2. परञ्च भाग्येश सूर्यः एवं कर्मेशबुधः द्वौ ग्रहौ दशमस्थाने युतिपूर्वकं राजयोगः रचयेते।

अत्र श्रीनाथयोगस्य सर्वाणिलक्षणानि इन्द्रतुल्यवैभवयुक्तं घटितानि। अतः जातकोऽयं इन्द्रतुल्यवैभवयुक्तं बुद्धिमान–विद्यावान च जातः।

**हरि–हर ब्रह्मयोगः –**

स्वान्त्यष्टस्थैदितीयेशाद हरियोगः शुभग्रहैः।
कामेशाद बन्धुधर्माष्टस्थितैः सौम्येर्हराभिधः।।
लग्नेशाद् बन्धुकार्माय–स्थितैब्रह्माह्वयः स्मृतः।
एषु जातः सुखी विद्वान धनपुत्रादिसंयुतः।।[1]





---

1. बृ.हो. 39/ 35–36

धनााधिपतिस्थितः द्वितीये–अष्टमे–द्वादशे स्थानेषु शुभग्रहः स्थिताः सन्ति। तर्हि 'हरिः' नामकराजयोग भवति। अस्यां कुण्डल्यां धनेशः शुक्रः द्वादशेभावे स्थितोऽस्ति। शुक्रतः द्वितीयभावे चन्द्रमा अष्टमभावे गुरु तथा द्वादशे बुध स्थितोऽस्ति। पूर्वाक्त सर्वेषु स्थानेषु शुभग्रहाः सन्ति चेत् कारणेन हरिःयोगः सञ्जायते।


**7.हरयोगः –**




यदि कुण्डलयां सप्तमेश यस्मिन्भावे सिथतः चेत् तस्मात् भावात् चतुर्थ–अष्टम–दशमभावेषु शुभग्रहाः स्थिताः सन्ति तर्हि हर नामकराजयोगः भवेत्।

अस्यां कुण्डल्यां सप्तमेश शुक्रः दशमे भावे स्थितोऽस्ति। दशमभावतः चतुर्थे–अष्टमे एवं दशमे भावेषु क्रमेण बुधः–चन्द्रः–गुरुः एते शुभग्रहाः स्थिताः सन्ति। अतः अत्राऽपि 'हर' नामको राजयोगः सञ्जायते।

**8.ब्रह्मयोगः –**





यदा पत्रिकायां यस्मिन् राश्यां लग्नेशग्रह स्थितोऽस्ति तस्मात् स्थानात् चतुर्थ,एकादश,दशमभावेषु शुभग्रहः स्थिताः सन्ति। तदा ब्रह्मयोगः सञ्जायते। अस्यां कुण्डल्यां लग्नेशग्रहः बुधः लग्नेशस्थाने स्थितोऽस्ति। अतः लग्नतः चतुर्थे–दशमे–एकादशे भावेषु क्रमेण गुरुचन्द्रशुक्राः शुभग्रहाः स्थिताः।

ब्रह्मयोगः तर्हि सञ्जायते। तेन कारणेन अस्यां कुण्डल्याम्। अस्य योगस्य जातः मनुष्यः धनवान, पुत्र–पुत्रादि युक्त तथा परिपूर्ण सुखी भवेत्।

**9. लग्नाधियोगः –**

लग्नान्मदाष्टगैः सौम्यै पापदृग्योगवर्जितै।
योगो लग्नाधियोगोऽस्मिन् महात्मा शास्त्रवित्सुखी।।[1]

अर्थात् अस्ययोगस्य कुण्डल्यां लग्नतः सप्तमभावे अष्टमभावे च पापग्रहेण अयुताः अदृष्टाः शुभग्रहाः स्थिताः सन्ति तर्हि लग्नाधि योगः सञ्जायते। योगेऽस्मिन् जातः मनुष्यः महातमा शास्त्रज्ञाः एवं सुखी भवेत्।




अस्यां कुण्डल्यां लग्नतः सप्तमभावे ुभग्रहौ गुरुः चन्द्रश्च स्थितौ स्तः।

तथा च लग्नतः अष्टमे भावे शुभभावे शुभग्रहौ बुधः–शुक्रौ स्थितौ स्तः। अतः अत्र श्रीपराशरोक्त लग्नाधियोगः पूर्वरूपे सञ्जजायते।

महर्षिपराशरेण लघपाराशर्यां बृहत्पाराशरहोराशरशास्त्रे च कथिता अन्यराजयोगानां विस्तारभयेन नामोल्लेखः एव क्रियते मया तद्यथा–

| | | |
|---|---|---|
| गजकेशरीयोगः | पर्वतयोगः | काहलयागः |
| चमरयोगः | शङ्खयोगः | भेरीयोगः |
| मृदगयोगः | शारदयोगः | कूर्मयोगः |
| खडगयोगः | कुसुमयोगः | कलानिधियोगः |
| कल्पद्रममयोगः | अधियोगः | सुनफायोगः |
| कारकयोगः | उभयाचारियोगः | शुभवेलायोगः |
| चन्द्रशुक्रकृतराजयोगः | उच्चस्थग्रहकृतयोगः | हीनवंशोत्पन्नराजयोगः |

---

1. बृ.हो. – 37 / 33

उपरोक्तराजयोगानां विशिष्टसंज्ञाः सन्ति। परञ्च लघुपाराशरीग्रन्थे योगाध्यायनामके तृतीये अध्याये केन्द्र–त्रिकोणाधिपतिसम्बन्धेन भाग्यकारक –राजयोगाः वर्णिताः। मध्यपाराशर्यां अधिधनप्रदयोगाः षोडशश्लोकैः वर्णिताः सन्ति। बृहत्पाराशरहोराशास्त्रग्रन्थे यथा –

1. भावेशफलाध्याये 148 श्लोकेषु द्वादशभावेशग्रहाणां परस्परसम्बन्धद्वारा उत्पन्न विविधराज्यकारकयोगाः वर्णिताः सन्ति।
2. त्रिंशततमे पदाध्याये लग्नपदतः ग्रहस्थित्यानुसारेण लक्ष्मी– राज्यधन –प्राप्तियोगाः विर्णताः सन्ति।
3. चतुर्त्रिंशततमे कारककांशफलाध्याये कारकांशकुण्डल्यां भवतिानां धन–यश–लक्ष्मी–राज्यसुखकारकाः योगाः वर्णिताः सन्ति।
4. पञ्चत्रिंशततमे योगाकरकफलाध्याये द्वादशलग्नेषु योगकारकग्रहपूर्वकं राज्यसुखादियोगकारक ग्रहफलानि अपि कथितानां तथा च षड्त्रिंशत अध्यायपर्यन्तं नाभसयोग इत्यादि विविधयोग–चन्द्रकृतयोग –सूर्यकृतयोग–राजयोग–राजसम्बन्धयोग–विशेषधनयोग नामान्तर–गताध्यायेषु यत्रतत्र राज्यसुख–समृद्धि–यश–कीर्ति–प्रसिद्धि–शौर्य – बल–लक्ष्मी–वाहन–भवन–गजाश्वादीनां इत्येषां सर्वेषां सुखप्रदाता–योगाः सफलवर्णिताः सन्ति।

विशिष्टेन श्रीपराशरमतेन ये योगाः लग्नकुण्डल्यां समुत्पद्यन्ते ते सर्वेऽपि कारकाकांशकुण्डल्यां अपि भवितुं शक्यन्ते इति स्पष्टं कथितुं शक्यते।

प्रमुखाचार्याणां मते प्रमुखराजयोगाः –

राजयोगेषु अग्रगण्य लक्ष्मीयोगनामकराजयोगविषये भिन्न–भिन्न आचार्यणां मते तेषां लक्षणानि कथितानि सन्ति। भिन्न–भिन्न कथितानि तत्र ग्रहाणां स्वोच्च–केन्द्र–त्रिकोणस्थिति शुभाशुभग्रहदृष्टि युति नवमांशे ग्रहस्थिति सूर्य–चन्द्रयो सह युति दृष्टि इत्यादिविषयक प्रभावानुसारेण राजयोगानां संरचना कथिता । कतिचन आचार्याणां मते पापग्रहप्रभावेन ग्रहाणां विशिष्टस्थिति कारणेन च राजयोगभङ्ग जायते वा न्यनं फलं प्राप्यते इति

वर्णितम्। अतः मया तेषां सर्वेषां परिशीलनं कृत्वा प्रमुखराजयोागनां विषये प्रमुखाचार्याणां मतानि प्रस्तूयते। यथा ––

**1.चन्द्राधियोगः –**

बृहत्पाराशरहोराशास्त्रे महर्षि पराशरेण चन्द्राधियोगस्य वर्णितं यथा –

चन्द्रादन्धारिकामस्थै सौम्यैः स्याद्धियोगकः।
तत्र राजा च मन्त्री च सेनानीश्च बलक्रमात्।।[1]

अत्र श्री पराशरमते यदि चन्द्रकुण्डल्यां केवलं चन्द्रतः षष्ठं–सप्तं तथा अष्अमे भावेषु शुभग्रहाः स्थिताः सन्ति चेत् तर्हि चन्द्राधियोगः सञ्जायते। किन्तु अत्र पापग्रहाणां युति–दृष्टि प्रभावविषये न कोऽपि उल्लेखं अस्ति।

**श्री वराहमिहिरकृत बृहज्जातकग्रनथे कथितं यत ––**

बुधगुरुशुक्रादि सौम्यग्रहाः यदि चन्द्रात् सप्तषष्टमेषु त्रिंषु स्थानेषु द्वयोर्वा स्थानयोः एकमस्मिन् वा सीाने सर्वे एव भवति तदा अधियोगः भवति। तत्र व्यासकृतौ विस्तरकृतौ पूर्वराचार्यै सप्तप्रकारको अधियोगः प्रौतः श्रीभट्टोत्पलकृत टीकायां श्रुतिकीर्ति आचार्यस्य मतमपि उद्धृतं यत् –

षट्सप्तमाष्टसंस्थैश्चन्द्रात्सौम्यैः शुभाऽधियोगः स्यात्।
पापः पापैरेवं मिश्रौमिश्रस्तथैवोक्तः।।

अर्थात् चन्द्रतः षष्ठाष्टसप्तस्थानेषु सौम्यग्रहाः सिथते सति शुभाऽधियोगः पापग्रहाः स्थिते पापाधियोगः तथैव मिश्रग्रहाः सति मिश्राधियोगः।

योगेऽस्मिन् जातानां बुधगुरुसितानां बलानुसारेण फलं लभ्यते। यदा ते ग्रहाः पूर्णबली मध्यमबली, हीनबली सन्ति तर्हि ते क्रमेण जातकोऽयं क्षितिपालः मन्त्री वा सेनापतिः भवेत् इति। यथा –

सौम्ये स्मरारिनिधनेष्वधियोग इन्दोस्तचमूपसचिवक्षितिपालजन्मः।
सम्पन्नसौख्यविभवाहतशत्रवश्च दीर्घायुधो विगतरागभयाश्च जाताः[2]

---

1. बृ.पा.हो. – 38/5 2. बृहजजातक– 13/2

जातकपरिजातग्रन्थे श्री वैद्यनाथमते चन्द्राधियोगविषये श्रीपराशर–मतानुसारेण एव फलं लक्षणानि च वर्णितानि सन्ति।

**फलदीपिकायां** श्री मन्त्रेश्वरेण चन्द्राधियोगस्य लक्षणानि फलं च किञ्चित् विशिष्टं कथितम् यथा –

सौम्यैरिन्दोर्द्यूनषडन्धस्तद्वदलग्नात्संस्थितैर्वाधियोगः।
नेता मन्त्री भूपतिः स्यात्क्रमेण स्यात श्रीमान्दीर्घजीवी मनस्वी।।[1]

अत्र तु सप्तमे–षष्ठे–अष्टमेभावे केवल शुभग्रहाः स्थिता चेत् तर्हि क्रमेण नेता–मन्त्री–भूपतिः भवेत् जातकः इति कथितम्। तथा च चन्द्रतः एवं लग्नतः द्वाभ्यां स्थानाभ्यां योगोऽयं सञ्जायते इति कथितम्। अन्याचार्यैः लग्नाधियोगस्य लक्षणानि पृथक–पृथक वर्णितानि।

**उत्तरकालामृतग्रन्थे–** श्रीकालिदासेन चन्द्राधियोगे पापग्रहाणां स्थिति–प्रभावं तत्र वर्णितं इति कथितम् यथा ––

षट्सप्ताष्टमभेषु सौम्यखचरास्त्वन्दो स्थितः नो खला।
राजा स्यादथावा समो यदि तदा जाताक महासौख्यम्।।[2]

**सारावलीग्रन्थे –**

श्रीकल्याणवर्मणा चन्द्राधियोगवर्णे सिंहराशेः प्रभावं अपि वर्ण्यते। तस्य मतानुसारेण यदि कुण्डल्यां चन्द्रतः षष्ठ–सप्तम्–अष्टमस्थानेषु सिंहराशि विहाय अन्य राशीसु श्शुभग्रहाः स्थितः सन्ति पापग्रहाणां दृष्टिरपि न चेत् तर्हि चन्द्राधियोगः सञ्जायते। यथा –

षष्ठं धेनमथाष्टमं शिशिरगोः प्राप्ताः समस्ताः शुभाः।
क्रूराणां यदि गोचरे न पतिता भान्वालयादूरतः।।
भूपालः प्रीवेत्स यस्य जलधेवेर्लावनान्ताद्भवैः।
सेनामत्तकरीन्द्रदानसलिलं भृङ्.गैमुर्हुः पीयते।।[2]

---

1. फल. – 6/42
2. उत्तर. – ग्रहभावखंड–36
3. सारावली– 35/21–22

न प्राप्नोति जरामाशु नो भजत्परितो भयम्।
जातः स्यादाधियोगेऽस्मिन् धृतिः सौभाग्यसौख्यभाक्।।[1]

**2.लग्नाधियोगः –**

ज्योतिषशास्त्रे फलकथने जन्मकुण्डल्यां भावानां शुभाशुभत्वे केन्द्रत्रिकोण –स्थानानि शुभ एवं त्रिषडाय त्रिक्स्थानानि अशुभस्थानानि कथितानि। अतः सामान्यतया जन्मकुण्डल्यां षष्ठं एव अष्टं स्थाने द्वै त्रिकस्थानेषु अशुभे ज्ञायते। किन्तु यदि लग्नकुण्डलीतः षष्ठे–सप्तमे तथा अष्टतमे स्थाने शुभग्रहाः सन्ति तर्हि 'लग्नाधियोगः' नामको राजयोगः सञ्जायते। तत्राऽपि लग्नाधियोगस्य लक्षणविषये भिन्नमतानि प्रवर्तते यथा –

**फलदीपिकायां श्रीमन्त्रेश्वरमते –**

लग्नाधियोगे लग्नाकुण्डल्यां यदि षष्ठे–सप्तमे–अष्टमे स्थानेषु केवल शुभग्रहाणां संस्थितिः चिन्तनीया। तत्र अन्य कोऽपि ग्रहाणां प्रभावविषयकं न चर्चितम्। राजयोगभेदाध्यायस्य द्विचत्वारिंशत्श्लोकेन अधियोगोऽयं वर्णितं तत् अग्रे मया लिखितम्।

**महर्षिपाराशरमते** स्वकीये बृहत्पाराशर होराशास्त्रे वर्णितः लग्नाधियोगेः पापग्रहाणां प्रभावमपि वर्णितं गण्यते यथा –

लग्नान्मन्दाष्टै सौम्यैः पापदृग्योगवर्णितैः।
योगो लग्नाधियोगेऽस्मिन् महात्मा शास्त्रवित्सुखी।।[2]

अत्र लग्नतः सप्तमे–अष्टमे भावद्वयोः शुभग्रहाः पापग्रहाणां युति दृष्टि विहाय स्थिताः सन्ति तर्हि लग्नाधि योगस्य संरचना कथिता। अन्य भावेषु ग्रहस्थितिविषयक ंना कोऽपि उल्लेखं कृतम्।

**श्रीवैद्यनाथमतानुसारेण**

लग्नाधियोगसंरचनायां चतुर्थस्थाने कोऽपि पापग्रहस्थितिः विहाय तथा च षष्ठे–सप्तमे–अष्टमे स्थानेषु पापयुति–दृष्टियुक्तशुभग्रहस्थितिः कथिता।

---

1. सारा. 35 / 23 2. बृ.पा.हो. – 37 / 37

**जातकपारिजातग्रन्थे** यथा –

लग्नादरिधूनग्रहाष्टमस्थैः शुभैर्न पापग्रहयोगदृष्टैः।
लग्नाधियोगो भवति प्रसिद्धिः पापैः सुखसीानविवर्जितैश्च।।[1]

**चन्द्रकलानाडीज्योतिषग्रन्थे –**

आचार्येण उपरोक्त सवैभ्यः आचार्येभ्यः कथितः लग्नाधियोगः विषये एकविंशति भावस्थितिः वणितं यथा –

लग्नाच्चंदाधियोगेषु पंचमे तु त्रिकोणगे।
शुभेवा त्वशुभेवापि अधियोगे न विद्यते।।[2]

अर्थात् यदि लग्न वा चन्द्रकुण्डल्यां यदि पञ्चते वा नवमे भावे शुभपापग्रहः स्थितो चेत् तर्हि लग्नाधि वा चन्द्राधियोगः निष्फलो भवेत्।

**3.गजकेसरीयोगः –**

राजयोगेषु अतिप्रसिद्ध गजकेसरी नामकराजयोगः चन्द्रगुरोः केन्द्रस्थिति संयोगेन सञ्जायते। तत्र केचनाचार्यः प्रापग्रहाणां युति–दृष्टि वर्ण्य गण्यन्ते। केचन अन्यप्रकारेऽपि गजकेसरीयोगस्य संरचना वर्ण्यते।

**महर्षि पराशरमतेन –**

चन्द्रतः बलीगुरुः शुभग्रहयुतदृष्टो भूत्वा केन्द्रस्थाने स्थितोऽस्ति तर्हि गजकेसरीराजयोगः सम्पाद्यन्ते इति। बृहत्पाराशरहोराशास्त्रे वर्णितम्। अत्र गुरुः अस्तगतः शत्रुक्षेत्री वा नीचस्थः न भवितुमर्हति।

अत्र न केवलं चन्द्रतः अपि तु लग्नतः केन्द्रे गुरोः स्थिते गजकेसरी योगः भवेत् इति आचार्यस्य मतं अन्यविद्वभिः: भिन्न वर्तते। यथा –

केन्द्रे देवगुरौ लग्नाच्चन्द्रादा शुभदृग्युते।
नीचास्तारिगृहैहीनै योगाऽयं गजकेसरी।।[3]

---

1. जातक.– 7 / 114
2. चन्द्रकला.नाडी, भाग–1 / 35
3. बृ.पा.हो. –37 / 3

**श्री वैद्यनाथमते –**

योगोऽयं द्विधा सम्भाव्यते। प्रथमं तु चन्द्रतः केन्द्रस्थानेषु गुरोः स्थितिवशात् योगोऽयं भवति। अत्र तु गुरोः बलविषये वा पापग्रहयुति–दृष्टिविषये न कश्चित् वर्णितम्।

द्वितीयप्रकारको गजकेसरीयोगः आचार्यमतेन तदा भवेत् यदि जन्मकुण्डल्यां अस्तंगतं चन्द्रोपरि बुध–गुरु–शुक्राणां दृष्टिः स्यात्। अत्र चन्द्रः स्वनीचराश्यां न भवितुं अर्हति।

केन्द्रस्थिते देवगुरौ मृगाङ्काद्योगस्ताहुर्गजकेसरीति।

दृष्टे सितायेन्द्रु सुतैः शशाङ्कैः नीचस्तहीनैर्गजकेसरी स्यात्।।[1]

**श्रीमन्त्रेश्राचार्यमते –**

फलदीपिकाग्रन्थे वर्णित गजकेसरीयोगवर्णने चन्द्रतः केन्द्रस्थानेषु गुरोः स्थितिमात्रेण गजकेसरीयोगः सञ्जायते इति लिखितम्। अत्र गुरोः बलवती स्थितिः विषये वा चन्द्रस्य अनस्तंगतः स्थितिविषये वा शुभग्रहाणां युतिदृष्टि विषये न कश्चित् वर्णनम्।

**श्री पद्मनाभाचार्येणमते –**

स्वकीय जातकादेशमार्गग्रन्थे गजकेसरीयोगस्य रचनायां श्रीपराशर–मतानुसारेणैव लक्षणानि गृहीतानि। फलमपि तादृशैव कथितम् यथा –

केसरीयोगे जातो धनवान् स्वकृताधियो महाप्राहाः।

ग्रामपुरगनरकर्ता सहस्रमासेसु जीवितं विधातृ।।[2]

श्री वैद्यनाथेनापि अस्ययोगस्य फलकथने जातकं तेजस्वी, धन–धान्य –युक्तः, मेधावी, गुणसम्पन्नः तथा राजप्रियः कथितम्।

गजकेसरीयोगस्य फलकथने श्री मन्त्रेश्वरमते जातकः सिंहसदृशः शूरवीर–रिपुहन्ता–गर्ववक्ता–राजसवृत्तियुक्तः–दीर्घजीवी–बुद्धिमान–स्वतेजसा –विजयी भवेत् इति कथितम्।

---

1. जातक. – 7 / 116 2. जातकादेशमार्गः – 8 / 34

गजकेसरीव रिपुवर्गहन्ता प्रौढ़वाक् सदसि राजवृत्तिः।
दीर्घजीव्यतियशाः पटुबुद्धितेजसाजयति केसरीयोगे।।[1]

श्रीवराहमिहिराचार्येण अस्य योगस्य विषये न कश्चित् विशिष्टोल्लेखः कृतम् स्वकीयग्रन्थे।

**2.महर्षि जैमिनोक्त राजयोगः –**

ज्योतिषशास्त्रे होराविभागे महर्षि जैमिनि अग्रगण्यः वर्तते। भारतवर्षे दक्षिणप्रान्तेषु तु अतिप्रसिद्धः तस्य रचना जैमिनिसूत्रम्। ग्रन्थोऽयं गद्यात्मकसूत्रेषु लिखितम्। अत्यन्तं संक्षिप्तसूत्राणि पूर्वापरानुसंधानात्मकमकानि सन्ति। अतः तेषां सम्यक् परिशीलनपूर्वकं अध्ययनं कृत्वा मया केचन मुख्यराजयोगानां विश्लेषणं कृतमत्र।

परच्च एतानि सूत्राणि किच्चित् क्लीष्टभाषायां लिखितानि वर्तन्ते। तत्र भावसंख्या राशिसंख्यायाः प्रचीन कतिपयवर्गादि प्रकारेण वर्णिताः सन्ति।

श्री जैमिनिमते फलकथने जन्मकुण्डयां लग्नतः एवं आरूढ़लग्नः तथा कारकांश कुण्डलीतः अपि ग्रहाणां प्रीाावं चिन्तनीयः। तत्र केचन् योगाः जन्मलग्ल–होरालग्न एवं घटीलग्नतः अपि सज्जायते इति वर्णितम् अस्ति।

1.**विशेषराजयोगः –**

जन्मकालघटिकास्वकेदृष्टासूराजानः।[2]
पत्नीलाभ्योश्च राश्यांशकदृक्काणौवा।[3]
तेष्वेकस्मिन् न्यूने न्यूनम्। [4]
एवमशंतो दृक्काणतश्च। [5]

---

1. फलदीपिका – 6/16
2. जैमिनि – अ.1/पाद–3/ सूत्रम् –24
3. जैमिनि – अ.1/पाद–3/ सूत्रम् –25
4. जैमिनि – अ.1/पाद–3/ सूत्रम् –26
5. जैमिनि – अ.1/पाद–3/ सूत्रम् –27

यदि जातकस्य जन्मलग्न–होरालग्न–वा घटीलग्नं त्रयोरपि लग्नेषु एकमेवग्रहः पूर्णदृष्ट्या पश्यति तर्हि जातकः राजा भवति।

यदि पूर्वोक्त लग्नेषु द्वयंलग्नं एकमेव ग्रहं पश्यति तर्हि किच्चितन्यनफलं परिपच्यते। अत्र पत्नी = लग्नस्थानं लाभ = सप्तमं स्थानम्।

यदि राशिकुण्डली नवांशकुण्डली–द्रेष्काणकुण्डल्यां त्रयोः लग्न सप्तमस्थाने एकमेव ग्रहः पश्यति तर्हि अपि जातकः महाराजतुल्यः भवति।

**2.राजवैतानिकयोगः –**

शुक्रचन्द्रयोमिर्थो दृष्ट्योः सिंहस्थयोर्वा यानवन्तः।
शुक्रकुजकेतुषु वैतानिकाः।।[1]

यदि जन्मलग्न वा लग्नपद कुण्डल्यां शुक्र एवं चन्द्रमा परस्परं अवलोकितो स्तः वा पदलग्नात् तृतीयभावे स्थितौः स्तः वा परस्परं त्रिकादश–स्थाने स्थितौ स्तः तर्हि जातकः वाहनवन्तः अस्ति। अत्र सिंहशब्देन तृतीय ग्राह्यः।

यदि शुक्र–कुज–केतु त्रयोऽपि ग्रहाः यत्र–तत्र स्थितेषु परस्परं दृष्टेषु वा तृतीयलाभसम्बन्धेषु चेत्रदा राजचिन्हविशिष्ट युक्ताः राजानो भवन्ति।

**3.राजचिन्हयोगः –**

''स्वदारगयोः शुक्रचन्द्रयोरातोद्य राजचिन्हानि च।[2]

आत्माकारकतः चतुर्थस्थाने यदि शुक्रचन्द्रयोः युतिः चेत् तर्हि जातमनुष्यः राजचिन्हः–छत्र–ध्वज–चामरयुक्तौ तथा रातोद्य युक्तो भवेत्।

**4.राजमान्ययोगः –**


''मातरि गुरौ शुक्रेचन्द्रे वा राजकीयाः।[3]

---

1. अ./1/3/28–29
2. अ.1/2/3/पाद–46
3. 1/3/35

**5.सेनानायकयोगः –**

**मेजरध्यानचन्द्रजी**




अस्यां कुण्डलयां लग्नतः – तृतीयस्थाने पापयुक्तः सूर्यः बलिष्ठः अस्ति।

तथा च षष्ठमे स्थाने पापग्रहः भौमः स्वक्षेत्री बलिष्ठः अस्ति। अतः योग पूर्णतया फलीभूतोऽस्ति।

पत्नी = लग्नस्थान तथा लाभ = सप्तमस्थानात् तेषां स्वामीतः अपि अर्थात् जन्मलग्नात् –पदलग्नात् –कारणात् ग्रहणीयः। लग्नेश सप्तमेषतः मातरि = पञ्चमस्थाने गुरु–शुक्र वा चन्द्रः अस्ति चेत् तदा राजकीया = राज्याधिकारिपः राज्यकार्य अध्यक्षाः भवन्ति जातकाः इत्यर्थः।

कर्माणि दासे वा पापे सेनान्यः।[1]

कर्म अर्थात् तृतीये दासे अर्थात् षष्ठस्थाने यदि पूर्वसूत्रोक्त जन्मलग्नतः–पदलग्न–कारकात्–लग्नेशतः वा सप्तमेशः तृतीये वा षष्ठे स्थाने पापग्रहः स्थिते सति जातकाः सेनापतिः भवतीति।

**6.महाराजयोगः –**

अथरारनिताभ्यां योग–योग लेयान्मेषाधिपः।

उच्चनीचसिस्वांशवती तादृशदृष्टिश्चशुभमातृदृष्टे यदि महाराजः।[2]

---


1. अ./1/3/36
2. अ./3/पाद/1 सूत्र–1–2

अत्र लेयः = लग्नं लग्नं मेष = पञ्चमस्थानं ।

जैमिनिमतानुसारेण राजजनितभ्यां योगे अर्थात् राजयोगकारक ग्रहसम्बन्धद्वयेन योगेने यदि लग्नेश वा पञ्चमेश स्तः तर्हि राजयोगः सज्जायते। ग्रहाणां परस्परं युति–दृष्टि–व्यत्ययः एकतरदृष्टि सम्बन्धचतुष्टयेषु यदि युति एवं व्यत्ययः सम्बन्धद्वयेन प्रबलराजयोगः समुत्पद्यते। अन्य द्वयाभ्यां तदपेक्षया लघराजयोग स्यात्।

उपरोक्तरीत्या भवितानां राजयोगां कर्तारौ ग्रहौ यदि स्व–स्व उच्च वा नीचराश्या।, स्व–स्व उच्च वा नीचनवांशे वा उच्चस्थ–नीचस्थ शुभग्रहेण मात्रेण दृष्टौ स्तः। तर्हि महाराजयोगो सज्जायते। तत्र जातः ऐश्वर्ययुक्तः सर्वविघलोकविभूतिना समलङ्कृतो भवति।

श्रीभरतजी (महाराजयोगः)




अत्र श्रीभरतस्य कुण्डल्यां – लग्नेश बृहस्पतिः पञ्चमेश चन्द्रेण सह युतिः सम्बन्धः क्रियते।

लग्नेश गुरुः पञ्चमे कर्के उच्चस्थं वा।

पच्चमेश चन्द्रः स्वक्षेत्रे पच्चमैव अस्ति।

परच्च उच्चस्थ भाग्येश भौमः अतः श्री जैमिनि कथितः महाराजयोगः पूर्णतया वर्तमानो अस्त अस्या कुण्डल्याम्।

**7.स्वदेशादन्यत्र राजयोगः –**


लाभलेयाभ्यां स्थानगः ।[1]

अत्र पूर्वोक्त सूत्रानुसंधाने अथ राजजनिताभ्यां योग–योगे लाभलेयाभ्यां स्थानगः। इत्यर्थः भवति। लाभ = सप्तमस्थान लय = लग्नम् उपरोक्तरीत्या भवितानां ग्रहाणां राजयोगजनितानां सम्बन्धचतुष्टयोक्त केनापि सम्बन्धेन यदि लग्नेश–सप्तमेश युज्यते तर्हि रातकाय स्वाजन्मस्थानाद् भिन्नस्थलं अन्यदेशे राजयोगोपलब्धिः भवति।

**8.जीवनोत्तरार्धे राजयोगः –**

'लेयलाभ्योः परकाले ।[2]

अत्रापि प्रथमसूत्रस्य अनुसंधानात्मकं सूत्रमिउम्। लग्नेश सप्तमेशो सम्बन्धकारणेन जातकास्य लग्नतः पदकुण्डलीतः कर्क उच्चौवस्थायां राजयोगोपलब्धिः भवति। **श्रीरामचन्दः**




परदेशे जीवनोत्तरार्धे च राजयोगः प्रभुश्रीरामचन्द्रस्य लग्नकुण्डल्यां –

लग्नेशचन्द्रः प्रथमस्थाने स्वक्षेत्री अस्ति।

सप्तमेशः शनिः स्वोच्चतुला राश्यां चतुर्थे अस्ति।

चतुर्थस्य शनिः लग्नस्य चन्द्रोपरि पूर्णदशम् पश्यते। अनेन श्रीप्रभुरामचन्द्रः प्रौढ़ावस्थायां विदेशे च राजयोगः प्राप्तवान्।

---


1. अ. / 3 / 1 / 4
2. अ. / 3 / 1 / 3

**9.मण्डलान्तराजयोगः –**

पितृधर्मयोलेर्यालाभयोगुरौ चन्द्रशुभदृग्योगे–मण्डलान्तः।[1]

राज्यपितृ = लग्नं, धर्मं = एकादशस्थानं लाभ = सप्तमभावः।

**श्रीकृष्णचन्द्रः**




अत्र लग्लैकदाशर्योलग्नसप्तमयोर्वा कुत्रापि गुरौ वर्तमाने चन्द्र एवं भावग्रहेण युतो वा दृष्टो चेत् तर्हि जातः मनुष्यः माहर्लिको राजा भवति।

अत्र भगवानश्रीकृष्णस्य कुण्डल्यां लग्ने एकादशस्थाने च चन्द्र–गुरौ स्थितौ स्तः। तस्योपरि स्वग्रहीशुभग्रहबुधस्य शुभदृष्टिः वर्तते। जातः स्पष्टतया मण्डलाधिपयोगः समुत्पद्यते। तथा सूर्य–शुक्र–गुरुः स्वक्षेत्री कथिता अस्ति।

**10.महन्त–मण्डलेश्वर –मठाधीशयोगः –**

लेपलाभयोश्चन्द्रे गुरौ शुभदृग्योगेमहन्तः।[2]


यदि लग्ने सप्तमे चन्द्रमा चेत् वृहस्पतिःशुभग्रहेण युक्तः दृष्टः स्यात् तर्हि जातकः महन्तः मठाधीशः वा प्रसिद्धधर्मोपदेशकः ऐश्वर्यसम्पन्नोश्च भवति।

लाभ = सप्तमस्थाने शुभदृग्योगे चन्द्रे सति जातको मण्डलेश्वरः पूजनीयो च भवति। अस्या कुण्डल्यां लग्ने चन्द्रः अस्ति। गुरुशुभग्रह शुक्रेण युतो अस्ति। चन्द्रबुधयोः शुभदृष्टिः सप्तमे अस्ति।

---

1. अ./3/1/12
2. अ./3/1/21–22

श्रीरामकृष्ण परमहंसः




**11.राजकुलोत्पन्नराजयोगः –**

स्वांशयोगे राजवंश्यो वा।
अशुभदृग्योगान्न चेन्न।। [1]

आत्माकारकग्रहस्य नवमांश राशि अर्थात् कारकांशकुण्डली लग्नराशि यदि लग्नतः केन्द्र वा त्रिकोणे भवेत् तदा राजवंशे जन्मः भवति। लग्नेश वा आत्माकारकग्रहः स्वोच्चनवांशे स्थितो चेत् वा उप्पस्थग्रहेण दृष्टो चेत् तदा राजकुलो जन्मः वाच्यम्।

यदि उपरोक्त ग्रहयोगे अपि अशुभदृष्टि विहाय शुभग्रहदृष्टियुक्तः ग्रहेण एव राजयोगः स्थाप्यते। अन्यािा न इति वाच्यम्।

---

1. अ.3/1/27–28

श्रीकालिदासेन 'उत्तराकालामृतं' ज्योतिषशास्त्रस्य प्रसिद्ध सर्वमान्यग्रहः वर्तते। ग्रन्थेऽस्मिन श्री पराशरोक्त जैमिन्योक्त आत्माकारकग्रहः कारकांश–कुण्डली लग्नपदं उपपदादि अष्टपदानि–होरालग्न–घटीलग्न तथा विशेष 'इन्द्रलग्नं' विचारपूर्वकं फलादेशविवेचनं कृतमस्ति। तत्र विविधयोगविषयकं ग्रहभावफलखण्डं नामके चतुर्थेखण्डे चर्चितमस्ति। तत्र जन्मसमयभेदतः राजयोगः निर्बलपापग्रहतः राजयोगः विशेषेण विपरीतराजयोगानां उदाहरणानि परिशीलनापूर्वकं विश्लेष्णं कृतम्।

**1.इन्दुलग्नेराजयोगः –**

''अर्कन्नागचतुष्टस्तनुर्जनना खेदयनं स्युस्तनोः चंद्राद्भाग्यप्योः
क्लौवधामिनः हृच्छिदः विधोर्यदगृहम्। तद्राशौ तु विपापशोभन खगे कोटीश्वरं
तन्वते चेतपापे तु सहस्रशः खलखने तुङ्गऽपि कोटीश्वरम्।[1]

उत्तरकालामृते श्रीकालिदासेन 'इन्द्रलग्न तः कोटीश्वरराजयोगः वर्णितः
तत्र विशेषेण जनद्वारा इन्दुलग्नं स्थाप्यम्। सूर्यादीनां क्रमेण –

| अर्कन्नाग | चटः | तनुः | जनः | नटः | खेटा | अयनं |
|---|---|---|---|---|---|---|
| 30 | 16 | 6 | 8 | 10 | 12 | 1 |
| सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनैः |

**कलागणनापूर्वकं**

लग्नकुण्डल्यां –चन्द्रकुण्डल्यां यः ग्रहः नवमेश चेत् तयोः द्वयोः योगकृत्वा द्वादशसंख्यया भाजनीयम्। यत् संख्या शेषः तत् तुल्यं, जन्मचन्द्रः गणलाकृत्वा 'इन्दुलग्नं स्थाप्यम्।

इन्दुलग्ने पापप्रभावमुक्तः एकादशशुभग्रहः चेत् तर्हि कोटीश्वरः


इन्दुलग्ने पापग्रहः चेत् तर्हि सहस्रशः मुद्राधिपः

इन्दुलग्ने उच्चस्थ पापग्रहेऽपि कोटीश्वरः भवेत् जातकः। अत्र तु जन्मकुण्डलीतः चन्द्रकुण्डलीतःभाग्येशग्रहस्थप्रभावः अपि महत्वपूर्णम्।


---

1. उ.का.–4 / 27

## माधुरीदीक्षित (जन्मकुण्डली




## इन्दुलग्न कुण्डली



**इन्दुलग्नगणना –**

लग्नकुण्डलीतः भाग्येशः बुधः = 8 कला।

चन्द्रकुण्डलीतः भाग्येशः भौमः = 6 कला।

**द्वयोः योगः 14 कला**

अतः 14÷12 = 2 स्थाने चन्द्रतः इन्दुलग्नं भेवत्।

अत्र चन्द्रतः द्वितीयेस्थाने मेषराशि अस्ति अतः मेषराशि इन्दुलग्ने प्रथमस्थाने स्थाप्यम्।

इन्दुलग्ने स्वगृहीभौमः मेषराश्यां वर्तते।

जन्मस्य भाग्येशग्रहः बुधः इन्दुलग्ने शुभफलदायी। तत्र लग्नकुण्डल्याः केन्द्रेश धनेश भौमः एवं भाग्येशबुधस्य युतिः सञ्जाता। अन्य कोऽपि विशिष्टयोगः रुचकयोगः विहाय न दृश्यन्ते परञ्च इन्दुलग्नतः जातः कोटीश्वरयोगः तां महोदयां धनसमृद्धिं प्रददात्।

**2.अभिजितकालामृतराजयोगः –**

रात्र्यार्द्धद् द्युदलातपरं यदि भवेज्जातो द्विनाड्यात्मके
काले स्यान्नृपतिर्जितारिनिशं स्वाचारविद्यावन्तः।
वित्रेतूच्चखगे स्वतूंगसगाद दृष्टेऽपि कोटीश्वरः
स्वक्षस्तेन यदीक्षते स हि भवेतलक्षाधिकारी सुखी।।[1]


अत्र तु अभिजितमुहूर्त महत्वपूर्णम्। यदि जातकस्य जन्म स्थापीय मध्यान्हे वा मध्यरास्त्रार्द्ध पश्चात् घटिकाद्वयं कालमध्ये भवेत् तहि जातः मनुष्यः जितारि = शत्रुजितः सदाचारी सत्ताधारी, विद्वान एवं धार्मिकः भवेत्।

अभिजितमुर्हूते जातस्य जन्मकुण्डल्यां यदि कोऽपि उच्चस्थदृष्टियुक्तो

---

1. उ.का.4/30

## स्व. मोरारजी देसाई




भारतदेशस्य भूतपूर्वप्रधानमन्त्री मोरारजीदेसाईमहोदयस्य कुण्डल्यां योगोऽयं महद्तया घटितो भवति। तस्य स्थानीय जन्मकालः मध्यान्हे एकवादने अभवत्। स्थानीय सूर्योदयकालः प्रातः 6.30 प्रातः आसीत्। अतः दिनार्धतः 2/230 घटीकालमध्ये तस्य जन्मकालः जातः। योगोऽयं अभिजितमुर्हूते गण्यते। अतः तस्य कुण्डलयां द्वितीये उच्चसी गुरुः आसीत्। तस्योपरि उच्चस्थभौमः पूर्णदृष्टिः क्रियते। अतः कोटीश्वरफलं प्राप्यते। अन्य सर्वैः गुणाः फलानि च कोटीश्वरफलं प्राप्यते। अन्य सर्वे गुणाः फलानि च तस्य जीवने घटितानि।

**3.नवमेशकृतराजयोगः –**

भाग्येकर्मणि तत्पती निवसतावेकत्र वा व्यत्पये
वान्यो न्यक्षगतौ निरीक्षण युतौ तौ राजयोगप्रदौ।
धीजायोदय बंधुपैश्च सहितौ तत्तद् गृहे वा स्थितौ
संपत्सौख्यकरौ तपोनिर्धनः कृल्लाभाधिपत्यं बिना।।[1]

---

1-उ.का.–4/3


यदि निम्नलिखतयोगेभ्यः कोऽपि योगः जन्मकुण्डल्यां समुद्भवते। तर्हि जातः मनुष्यः धन–मान–सुख–समृद्धिः प्राप्यते।

1. नवमेश नवमस्थाने तथा दशमेष दशमस्थाने अस्ति चेत्।
2. नवमेश–दशमेशयोः युतिः नवम वा दशमभावे चेत्।
3. नवमेश–दशमेश सीानपरिवर्तन–व्यत्यसम्बन्धः चेत्।
4. नवमेश–दशमेशयोः परस्परं दृष्टि सम्बन्धः चेत्।
5. नवमेश वा दशमेशग्रहस्य चतुर्थेश–पञ्चमेश वा सप्तमेश ग्रहेण सह युतिः भवेत्।
6. नवमेश–दशमेश केन्द्र–त्रिकोण अस्ति चेत्।
7. नवमेश एवं दशमेशय द्वयोऽपि एकग्रहस्य नक्षत्रे स्तः वा परस्परं नक्षत्रपरिवर्ते स्तः तर्हि।

जातकः राजयोगफलस्वरूपे धनवैभवयश तथा सुख–समृद्धिः प्राप्यते।

अत्र आचार्येण अस्य योगस्य अपवादमपि कथितं यत् नवमेश–दशमग्रहयोः यदि अष्टम वा एकादशभावेन सह सम्बन्धः अस्ति तर्हि चेत् उपरोक्तयोागनां भवति।

**श्रीविश्वेश्वरैया**



नवमेश सूर्य दशमे योगकारकः अस्ति।

दशमेशबुधः स्वोच्चराश्यां दशमे अस्ति।

नवमेश–दशमेशयोः दशमे युतिः राजयोगकारकः भवति।


लग्नेश पञ्चमेश गुरुः भौमयोः युतिः भाग्यभावे राजयोगकर्ता अस्ति।

**4.केन्द्रस्थग्रहकृतराजयोग –**

चेल्लग्नादिचतुष्टये पणफरे सर्वेऽपि खेटाः स्थिताः।
चापोक्लीव ग्रहे न चेदिह भवेज्जातो नरो भुपतिः।
चेन क्रूरयुतिक्षिताः शुभ खगाश्चंद्रोऽपि पूर्णस्तथा।
स श्रीमान् सुजनेहितो बलयुताः पूर्णं न चेदूनताः।।[1]

यदि जन्मकुण्डल्यां सर्वेऽपि ग्रहाः लग्न–चतुर्थ–सप्तम एवं दशमकेन्द्रेषु स्थिताः सन्ति तर्हि जातः मनुष्यः भूपतिः भवेत्। वा उच्चाधिकारी प्रतिष्ठित नेता वा भवेत्। यदि पणफरभावे सर्वेग्रहाः सन्ति तर्हि फले किञ्चित्न्यूनता वर्तते। यदि शुभग्रह बलयुक्ता चेत् एवं पापेदयुक्तः दृष्ट5 ना चेत् तथा चन्द्रः अपि पूर्णमासन्न अस्ति तर्हि चेत् जातकः धनवैभव–सम्पन्नः, प्रतिष्ठत विद्वान वा अधिकारी भवेत्। यदि ग्रहाः पूर्णकेन्द्र बलयुता न चेत् तर्हि फले न्यूवता भवेत्।

इटलीसम्राट विण्टर इमैन्युअल




---

1. उ.का. – 4/29

इटलीदेशस्य सम्राट महोदयस्य कुण्डल्यां लग्नं एवं चन्द्रकुण्डली एकमेव अस्ति तत्र –

1.सूर्यचन्द्र–भौम–बुध–शुक्र–गुरुकृते षड्ग्रहाः केन्द्रचतुष्टयेषु सन्ति।

2.एकमेव ग्रहः शनिः एकादशेभावे अस्ति। 3.परञ्च लग्नस्थ मकरराशि –स्थितः भौमः एकादशस्थ वृश्चिक राशिस्थितः शनिना सह परिवर्तनं सम्बन्धः स्थाप्यते। 4.तत्र दशमे तुलायां स्थितः सूर्यस्य नीचभङ्ग राजयोगः अपि वर्तते। 5.दशमे शुभदृष्टः शुक्रः मालव्ययोगकारकः अस्ति। अतः जातकोऽयं विशिष्ट गुणग्राही, विद्वान, सरल, निपुण, तर्कपूर्ण एवं विशिष्ट राजनेता आसीत्।

**5.लग्नपदकृतराजयोगः –**

स्सः स्यात्लग्न पदे–पदे युते चेद्भोगभाग्यैधुतः
स्तस्मात्मकेन चतुष्टये शुभ खगे राजा महापंडितः।
क्रूर स्तत्र विपर्यया यदि पुनः षष्टाष्टरिःफेषु वा
ह्येयं सर्वपदैः शुभाशुभफलं सम्यग्विचार्यादिशेत्।।[1]

कालिदास जन्मकुण्उली अतिरिक्तं आरुढलग्नमपि महत्वं प्रदशयेत् अत्र। यदि आरुढलग्नं वा लग्नपदकुण्डल्यां यदि लग्ने शुभग्रहस्यराशिः चेत् वा शुभग्रहस्थितौ चेत् तर्हि जातकः भाग्यवान् तथा वैभवसम्पन्नो भ्एवं समृद्धियुकतो भवति।

यदि लग्नपदतः केन्द्रे वा त्रिकोणभावेषु शुभग्रहः चेत् तर्हि जातकः विद्वान एवं सत्ताधारीधानिकः भवेत्। तद् विपरीते विपरीतफलं प्राप्यते।


लग्नपदतः 6/8/12 स्थानेषु पापग्रहाः अशुभाः सन्ति। सर्वारिष्टप्रकारकाणां उपपदलग्नां शुभाशुभत्वं उपरोक्तैः ग्रहस्थित्यानुसारेण चिन्तनीयम्।

---


1. उ.काला. – 4/35

# डॉ होमी भाभा

## लग्नकुण्डली




## आरुढलग्नपद कुण्डली




अत्र लग्नेश शुक्रः स्वस्थानात् द्वितीयेभावे अस्ति अतः द्वितीये अर्िात् तृतीये धनुराशे आरुढलग्नं स्यात्। आरुढलग्नेश गुरु दशमे शुभग्रहेण बुधेन युक्तः स्यात्। जन्मकुण्डलयाः भाग्येशबुधः आरुढे स्वोच्चराश्यां केन्द्रे अस्ति। जन्मकुण्डल्याः कर्मेशचन्द्रः आरुढे पंचमभावे त्रिकोणे अस्ति। जन्मकुएडल्यां योगकारकशनिः आरुढे केन्द्रे अस्ति। अतः जातः विद्वान–धनी–मानी – वैभवयुक्तः भवति।

**6.वर्गोत्तमग्रहः लग्नकृतराजयोगः –**

स्वोच्चस्वर्क्षसुहृतत्रिकोण ग्रहयाः केन्द्रोत्तमांशान्विता।
सौम्यैरीक्षितयुक्तः मध्यगताः मूलत्रिकाणाश्रिताः।
भावारोहण खेचराः शुभकराः केन्द्रत्रिकोणाधिपाः
सम्बन्धेन परस्परं सुयशंसं कुर्वन्ति राजोत्तमाम्।।[1]

यदि जातकस्य कुण्डल्यां स्व–स्व मूलत्रिकोण–मित्रराश्यां स्थितग्रहः केन्द्रत्रिकोणं स्थितग्रहाः तथा वर्गोत्तम अर्थातृ लग्नकुण्डल्यां एवं नवांशकुण्डल्यां एकस्यां राश्यां स्थिताग्रहाः तथा वर्गोत्तमलग्नामपि परस्परसम्बन्धमात्रेण राजयोगकारकाः स्युः।


**श्रीसर आइजन होपर (लग्नकुण्डली)**




---

1. उ.का. 4/1

# वर्गोत्तमनवांश कुण्डली




अमेरिकी भूतपूर्वराष्ट्रपति महोदयस्य जन्मकुण्डली वर्गोत्तमलग्नस्य एव वर्गोत्तमग्रहस्य उत्तमं उदाहरणमस्ति।

तस्य लग्नकुण्डल्यां मानलग्नं वर्तते। नवांशकुण्डल्यामपि मीनराशेः अंतिमनवांशः वर्गोत्तमः भूत्वा नवांशलग्ने वर्तते। अतः अत्र प्रबलवर्गोत्तमलग्ने जातम् इति राजयोगकारकः। नवांशकुण्डल्यामपि सूर्यः वर्गोत्तमी अस्ति। लाभाधिपतिः शनिः लग्नकुण्डल्यां भाग्ये वृश्चिकराश्यां अस्ति। लग्न एवं नवांश कुण्डल्यां वर्गोत्तमी स्थितयां राजकारकयोगकारकः अस्ति।

**7.निर्बलपापकृतराजयोगः –**

पापाः नीचगताः शुभा बलयताः केन्द्रत्रिकोण स्थिताः
स्वेहा स्युर्यदि कर्मभाग्य गृह्या भाग्येऽथ्वा कर्मणि।
राजा स्यान्मतिमान्महाधनयुतः ख्यातः प्रतापान्वितो
दीर्घायु परभूपवन्दितपदः सर्वज्ञतुल्यः सुधी।।[1]

यदि जातकस्य जन्मकुण्डल्यां – अशुभफलदायी पापग्रहाः नीचस्थाः चेत् निर्बला चेत् बली शुभग्रहाः केन्द्रे वा त्रिकोणे सन्ति। तथा चतुर्थ–नवम एवं दशमभावाधिपतीनां युतिः भाग्ये वा कर्मभावे अस्ति तर्हि जातकः धनी–मानी–प्रसिद्धि–विद्वान–पराक्रमी–यशस्वी–बुद्धिमान–दीर्घायु–ज्ञानी–सर्व तुल्यः एव अन्यभूपवन्दितः राजा स्यात्।

8.**राजाधिराजयोगः –**

रन्ध्रेशो व्ययषष्ठगौ रिपुषतौ रन्ध्रे व्यये वा स्थिते
रिष्फेशोऽपि तथैव रंध्ररिपुभे यस्यस्ति तस्मिन्वदेत्।
अन्योन्यर्क्षगता निरीक्षणयुष्ताश्चन्यैरयुकतै क्षिता
जातोऽसौ नृपतिः प्रशस्तविभवो राजाधिराजशेखरः।।[2]

यदि जातकस्य कुण्डल्यां त्रिकस्थानाधिपः अन्यत्रिकस्थानेषु स्थिताः सन्ति अर्थात् –

अष्टमेशग्रहः व्यये वा षष्ठे।

षष्ठेशग्रहः अष्टमे वा व्यये।

व्ययेशग्रहः षष्ठे वा अष्टमसीाने स्थिता सन्ति परं च अन्य ग्रहेण न युता न दृष्टाः सन्ति। निर्बला सन्ति। तथा च अन्योन्येन युति–दृष्टि व्यत्यसम्बन्धेन संयोगं क्रियते तदा जातः मनुष्यः प्रसिद्धिः, धनी, मानी, वैभवयुक्तः राजाधिराजः भवेत्।

---

1. उ.का.–4/23
2. उ.का.–4/22

**9.लग्नद्रेष्काणकृतः राजयोगः –**

'लग्नास्यदिम मध्यमन्तिमयुतो लग्नाधिनाथ क्रमात्
कुर्याद् दण्डपतिं च मण्डलपतिं ग्रामाधिपं तच्छिशुभम्।
शुक्रापेन्दुाजवीक्षितश्च सहितश्चेत्सौम्यवर्ग स्थितः।
स्वोच्चो वाखिलभूमिपापकर्मसु भुपालबंधं वरम्।।[1]

जन्मकुण्डल्यां यदि स्वगृही लग्नेशः लग्ने प्रथमद्रेष्काणे स्थितो चेत् तर्हि जातकः दण्डपतिः, द्वितीयद्रेष्काणे चेत् तर्हि मण्उलपतिः तथा तृतीयद्रेष्काणे चेत् तर्हि ग्रामाधिपः भवेत्।

यदि सः लग्नेशः बुध–गुरु–शुक्रेण वा युतो दृष्टो चेत् तर्हि वा शुभग्रहाणां षड्वर्गे सितो चेत् तर्हि भूमिपालकः लग्नेश उच्चस्थः षड्बलयुक्जो चेत् तर्हि अन्य नृपैः सम्मानी भवेत्।

**10.चन्द्रकृतराजयोगः –**

स्वोच्चस्वर्क्षुसुहृदभगः पितृगृहे बंधो खभे सप्तमे
वीर्याढयो गुरुशुक्र वीक्ष्णयुतः पूर्णो विधुश्चेत्तद।
लग्नात्स्वदगौ कुजार्कितनयो चैव स्थिते भोगवान्
सर्वज्ञः सगुणाकरो जननुतः स्याद्वदन्यो महान्।।[2]

यदि जन्मकुण्डल्यां पक्षबली चन्द्रमा स्वोच्चराश्यां स्वराश्यां वा मित्रराश्यां केन्द्रे वा त्रिकोणे स्थितो चेत् तर्हि गुरु वा शुक्रेण युतो–दृष्टो चेत् तथा भैम एवं शनिः अपि स्वोच्च–स्वक्षेत्री–मित्रक्षेत्री भूत्वा लग्नतः द्वितीय वा दशमेभावे शुभग्रहेण युतौ–दृष्टौ स्तः तर्हि जातकः सर्वज्ञः सत्कर्मी, विद्वान, गुणी, उदार, धनी, वा प्रतिष्ठितो भवेत्।

---

1 उ.का–4/7

2. उ.का.–4/8